सरस्वतीकण्ठाभरणविवरणे

चतुर्थपरिच्छेदः

४० पत्राणि

३२५

९६

सप्तशती कंठा सं॑ विवर्ण

२...

नं ३३५८

सप्तशतीकर्ताविवरण [illegible]

विवरण

२५ पत्र [illegible]

२० पन्ना

अवस्था साधारण

अक्षर - [illegible]

लिपि सं. १९५ [illegible]

श्रीगणपतयेनमः॥ इदानीमर्थालंकारविवेचनाय चतुर्थं परिच्छेदमारभते। शब्देभ्य इति। याश्चार्थालंक्रियास्त्विता दिभ्यः शब्दे
भ्यो विशिष्ट उपमादिरूपोऽर्थो ज्ञायते। ता अर्थालंक्रियाः स्युः। की[illegible]ः कवीनां प्रियाः प्रीतिविषयाः उपमादीनां कविसर्वस्वाय
मानत्वात्। शब्दश्चार्थश्चेत्युभयं। सह तुल्ययोगितया वर्तते स तुल[illegible] योगितः। एवमितरेष्वपि। परिस्फूर्तिः परिकरः। नाविकैरिति
सहार्थे तृतीया॥ उपमालक्षणमाह प्रसिद्धेरिति। अर्थयोरुपमानोपमेययोर्मिथो योऽन्यसां प्रचुराणामवयवसामान्यानामेक
देशसाधर्म्याणां योगः संबंधः सा इह ग्रंथे उपमा मता। नहि मुखं कमलमिवेतिवत् कुमुदमिवेत्यपि स्यादत आह प्रसिद्धेरिति·
प्रसिद्धेर्लोकप्रसिद्धेरनुरोधेन पुरस्कारेण तथा च कुमुदमुखयोरुपमानलोकसिद्धत्वदोषः। इहाभिधीयमानार्थप्रतीय
मानार्थविषयतयोपमा द्विधा सापि पदवाक्यप्रपंचभेदात्त्रिधा। तासां त्रिधाभूतानां प्रत्येकमष्टविधत्वेन चतुर्विंशतिप्रका
रोपमेत्याह एकेत्यादि। पदोपमाया अष्टविधत्वमाह समासादिति· समासोपमा इवार्थत्यादिना च त्रिविधा॥ मुखमित्यादि
हे सुंदरि तव मुखं चंद्रवत् सुंदरं तव भुजालतिके बिसकिसलयकोमले मृणालपल्लववत्कोमले तव जघनस्थली शैलपा
षाणवद्दीर्घत्वं इति। पूर्वोपदिष्टया वाक्यसमासौ वा इवाद्यैः तुल्यता। भक्तिर्विभागः भक्तिर्विभागसेवायामिति मेदिनिकारः॥
चंद्र इति। चंद्रसदृशं मुखमस्या अष्टतस हृद्यो मुखरसस्तस्याः। सकचग्रहहरणमनोज्ज्वलचुंबनं कस्य सदृशमस्याः कश्चि
न्मनोविनोदार्थं वयस्याय कांताप्रकर्षं कथयति चंद्रेति। कचग्रहे केशपाशग्रहणे यो रणस आवेशस्तेन सहितमुज्ज्वलं मनो राम
ज्ञं चुंबनं। इहांतर्भूतं समासेन बोधितं सामान्यं साधर्म्यं सौकुमार्यादिकमित्यंतर्भूतसामान्या। न श्रूयते चेत्तर्हि नास्त्येवेत्यत आ

इवतीयत इति। द्योतकादिति सादृश्यस्य सद्भावप्रतियोगिकत्वात ...कत्वमेव द्योतकत्वमित्यर्थः। उपमानेति उपमीयते
सादृश्यमानीयतेऽनेनोत्कृष्टगुणेनान्यदित्युपमानमित्यर्थः। उपमेय इति उपमीयते सादृश्यमानीयते न्यूनगुणं यत्तदुप
मेयमित्यर्थः॥ ॥ कमलेत्यादि। कमलकरा रंभोरुः कुवलयनयना मृगांकवदना च। कथं ...नु नवचंपकांगी दृष्टा न वाड्
:प्रियाद्दहति। ईदृशी कांता कथं नु न दहति तापयति किंतु तापयत्येव। रंभे कदल्याविव ऊरू यस्याः सा। नवचंपकं चंपक
कलिका। इह कमलमिव ताम्रौ करौ यस्याः सेत्यादाविवशब्दो द्योतकः। सामान्यं ताम्रत्वादिकं तयोश्च समासेनैवोक्ततयोत
ते वार्थयं॥ ॥ शरदित्यादि। ईदृशी सा स्त्री मम मनः कथं न निशं दहति। कीदृशी शरच्चंद्ररम्यमुखी नीलनलिनपत्रदीर्घ
नेत्रा कदलीमध्यसुंदरोरुश्च। इहोपमानमिंदुरुपमेयं मुखं तुल्यधर्मः सुंदरत्वमेव मन्यत्रापि। शारदेंदुरिव सुंदरं मुखं
यस्याः सा इतीवार्थस्यापि समासाभिधेयता। सर्वः समासोयस्यामित्यादिविग्रहे विवक्षितार्थालाभ इत्यत आह सर्वमिति
॥ ॥ प्रत्ययोपमापि पदोपमाभेद एव न त्वधिकेत्याह य इति पद प्रत्यययो रन्वयबोधनेऽन्योन्यापेक्षित योपमा सामपि तयेति न
भिन्नता। प्रत्ययेति प्रत्ययार्थानां भेदादित्यर्थः। अस्फुटत्वेनात्र उदाहरणमिति। रूपव्यक्त्यै स्वरूपज्ञानाय॥ हंसइत्यादि देवा
भिनिष्क्रान्तस्तु वचने यदि त्वं वदसि तदा हंसो ध्वांक्षविरावी काकइव विरौति कोकिल उष्ट्रक्रोशी उष्ट्र इव क्रुश्यति शब्दाय
ते मयूरोपि खरनादी गर्दभ इव नदति। ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपीत्यमरः। रासभो गर्दभः खर इति च।
इह ध्वांक्ष इव विरौतीत्यादौ कर्तर्युपमाने इति णिनि प्रत्यय उपमान उपपदे कर्त्तरि विहित उपमेयस्यार्थं नवति सामा

नाधिकरण्याद्विरोधात् ॥ ॥ पूर्णेत्यादि· सा स्वप्नेऽपि न दृश्यते। कीदृशी पूर्णेन्दोरीषदसमाप्तं वदनं यस्याः सा। मृणालादीषदसमाप्ता
दोर्लता यस्यां सा। चक्रादीषदसमाप्तं जघनं यस्याः सा। इह कल्पत्यादावीषदसमाप्तौ कल्पब्देश्यदेशीयर इति कल्पबादयः।
इह पूर्णेन्द्वादय उपचारेणोपमेयत्वमप्रस्तुतं समभिव्याहृत कल्पबादिना स्वार्थिकप्रत्ययेन चोपमानार्थातिशय एवाभि
धीयत इति प्रत्ययस्योपमानार्थतां इदमेवाहवाद इति। गुणभूतमिति अतिशयस्य प्रत्ययार्थत्वेन तन्निरूपकत्वमेव गुणत्वमि
त्यर्थः॥ ॥ स्वर्गीयतीत्यादि· चंद्रः स्वर्गीयति· स्वर्ग इवाचरति. कामोऽत्ति हृतायते अतिहृतवद्भवति प्रियावियोगे हृतः पुनः
स्वर्गोऽपि नरकीयति नरक इवाचरति। स्वर्गीयतीत्यत्रोपमानादाचारे इति क्यच्। अतिहृतायत इत्यत्राचारार्थे कर्तुः क्यङ्
सलोपश्चेति क्यङ्। नरकीयतीत्यत्राधिकरणाच्चेति क्यच्। इहाचार आचरणक्रिया सा चोपमानोपमेयसाधारणीति सामा
न्यार्थता प्रत्ययस्य॥ ॥ एक इत्यादि· एक एव भूतात्मा· परमात्मा· भूतिदेहमवस्थितः सन् एकधा बहुधा च· एकानेकप्रकारेण
जलचंद्रवद्दृश्यते। इह जलचंद्रवद्दृश्यत इत्यत्र वार्थसादृश्ये वतिः। ननु तुल्यक्रियत्वे तदाह दृश्यत इति पदेन· वतिना च समार्थत
यापीनरुक्तं स्यात्। ननवतु तुल्यक्रियाप्रयोगः किमनिष्टमत आह तदिति· गौरिव गवय इत्यादौ क्रियाया अप्रयोगात् तुल्यक्रि
याप्रयोगाभाव इति भावः॥ ॥ वाक्योपमाया अष्टविधत्वमाह वाक्येति। तत्र उपमायां। मिथोऽन्योन्ये साम्य इति यावता मि
थोऽन्योन्ये रहोऽर्थे च मिथोऽन्योन्यसमुच्चय इति मेदिनिकरः। आद्यां पदार्थोपमा। पूर्णा सामान्यधर्मादिसाकल्यवती। प्रयोग इ राम
ति सर्वत्रान्वीयते॥ कमलमित्यादि· हे मादिरेक्षणे रक्तनेत्रे· तवैवा[illegible]पद्ममिव चारु वाङ्कहृदयं. विषमिव दृढं. कवरीकेशवेशो भ्र २

मरपंक्तिरिव नीलोऽस्ति। मदिरावद्रक्तमीक्षणं नेत्रं यस्याः सा। कवरीकेशवेशः स्यादित्यमरः। इह कमलमुपमानं इव पदं द्योत
कं चारुपदं तुल्यधर्मोपस्थापकं वदनमुपमेयमिति पूर्णता। पदार्थयोः सादृश्यं वाक्यार्थः॥ ॥ सामान्यधर्मादीनां लोपे विरहे लु
प्ता। तर्हि सर्वलोपे उपमेव न स्यादत आह प्रतीयमान इति। तथात्वेपि प्रसिद्ध्यैव कांत्यादितुल्यधर्मप्रतीतिरिति भावः॥ नेत्या
दि इदं न पद्मं किंतु कांतायाः मुखमेव। नेत्रे भ्रमरौ किंतु इमे नेत्रे। न केशराणि किंतु इमास्ताः प्रसिद्धा दंतपंक्तय एव। चक्षुषी इमे
इत्यत्र ईदूदेद्द्विवचनं प्रगृह्यमिति प्रगृह्यत्वं। पद्ममिदं कांतास्यमिति मिथ्याज्ञानं तस्य प्रत्याख्यानं निषेधो न प[illegible]मिएवं चे
वाच्यत्वाभावेपि कांत्यादेः प्रसिद्ध्यैव प्रतीतेरियं लुप्ता॥ राजीवमित्यादि हे प्रिये। तव मुखं पद्ममिव। नेत्रे नीलनलिने इव। ऊरू कद
लीस्तंभाविव। स्तनौ हस्तिकुंभाविव। स्तः। उत्पले इवेति। ईदूदेद्विति प्रगृह्यसंज्ञा। इह सामान्यधर्मस्य कांत्यादेर्लोप इतरेषां
पूर्णतेति लुप्तपूर्णा॥ ॥ त्वदित्यादि इदं विहृतं सदृशव्यतिरेकस्थले। तंत्रेण प्राधान्येन। तंत्रं प्रधाने सिद्धांते इति मेदिनिकरः। य
द्वा तंत्रेण एकार्थप्रयोजकेन। इह सदृशयोर्मुखपद्मयोः प्रधानांगभावेन नाभिधानं। तुल्यता च पदार्थः। एवं च मिथोन्वये नो
पमानोपमेयत्वाभिधानं फुल्ले इति। विशेषणद्वयमेकशेषेणाह। तूपमानोपमेयतुल्यधर्मद्योतकपूर्णता इवादिलोपस्त्वर्था
र्थत्वादतः पूर्णलुप्तेयं। यत्र समकक्षतया द्वयोरभिधानं तत्र श्लेष एवेत्यतिव्याप्तिरत आह श्लेष इति॥ ४॥ वाक्यार्थस्य वाक्य
सापेक्षतया तद्भेदता। एकद्वव शाद्धोयस्यां सा॥ पाण्ड्य इत्यादि [illegible]यं पाण्ड्यो राजन्दे. दःशोभते। कीदृशः अंसे स्कंधेऽर्पितो दत्तो

लेवहारोयेनसः। हरिचंदनेन चंदनभेदेन कृतांगानुलेपनश्च। नवकिरणलोहितशृंगः प्रवहन्निर्झरश्च हिमवानिव। इहह
योर्वाक्यार्थयोरुपमानोपमेयभाव एकेनैवेव पदेनोक्त इत्येकेवोपमेयं॥ ॥ दिनइत्यादि। सा गौरी दिने दिने प्रत्यहं लावण्यमया
नू कांतिप्रधानान्विशेषाद्युत्कर्षान्पुपोष पुष्णाति स्म। परिवर्द्धमाना सती। कीदृशी लब्धः प्राप्त उदय उपचयो यया सा। यथा
चांद्री लेखा कलाज्योत्स्नाप्रत्यहं वर्द्धमाना च सती कलांतराणि अन्या अन्याः कलाधत्ते ज्योत्स्नांतराणि च धत्ते तथेत्यर्थः। ला
वण्यं ज्योत्स्नास्थानीयं विशेषः कलास्थानीयः। यद्वा कलांतराणि कीदृशानि ज्योत्स्नाऽंतरागर्भीयेषु तानि। यद्वा ज्योत्स्नायाऽं
3 तरोऽवकाशो येषु तानि। लेखास्याल्लिपि कलयोरिति विश्वः। चंद्रमस इयं चांद्रमसी तस्येदमित्यण्। लावण्यं चारुता मतेति
शाश्वतः। गर्भो वृकाश भेदेष्वंतरं वाच्यलिंगवदिति मेदिनिकारः। इह पोषणरूपक्रियया वाक्यार्थयोरेकवाक्यता सा च सक
र्मिकेति कर्तृकर्मणोः पृथग्विपदद्वययोगादनेकेवोपमेयं॥ ॥ दिवइत्यादि। नवा रश्मेर क्षायैः पुलोमारिरिंद्रो दिवः स्वर्गा
स्य रक्षायै जागर्त्ति। तेन इंद्रेणासुरा हन्यंते त्वयान्नृपा हन्यंते। सावलेपाः सगर्वा इति नृपविशेषणं। पुलोमनामा दैत्यभेदः
स चेंद्रेण हतस्तत्सुता पुलोमजेंद्राणी च गृहीतेति पुराणं। इह तुल्यासमेक क्रिया जागरणरूपा हननरूपा तद्द्वयघटित एवो
पमानोपमेयभावः॥ ॥ प्रहितइत्यादि। अयं विंध्यताऽस इह शोपमविशेषगुणे। इहान्यरूपैः साधर्म्येपि वाच्यधर्मउपमानए राम
वनिषेधेन नियमितइति वैधर्म्येनद्वितीयमुपमा॥ ॥ प्रपंचोपमायाऽष्टविधत्वमाह यथेति वाक्यार्थवचनसंख्या। यच्च वाक्या ३
र्थयोर्विस्तारेण साहश्यं ज्ञायते सा प्रपंचोपमा। तस्या विभागमाह सेति प्रकृतरूपं साहश्यं कं विकृतं रूपमौपाधिकं। अली

त्यादि॰ नतांवसंतेललनाइवश्रियइवाधिकंशोभंते। कैः अलकैरिव भृंगद्वंद्वैः पुष्पगुच्छैः कुचैरिव। पल्लवैः पाणिभि
रिव। इहावयविनोर्लताश्रीरूपयोरवयवानामेकदेशानामलिवलयालकादीनां साम्येणोपमानोपमेयभावात्स
मस्तोपमानं तेषां च प्रकृतत्वं प्रसिद्धमेव॥ ॥ कमलेत्यादि॰ पद्मिन्यः शोभंते। कैः अधरैरिव पद्मपत्रैः दंतैरिव किंजल्कै
ः अलकैरिव भृंगसंघैः मुखैरिव पद्मैः। इह विस्तरोपमया प्रपंचोपमाहं स्तनादित्यागात् कमलदलादिनासहाधरा
देरेकदेशस्योपमया चैकदेशोपमेयं॥ ॥ लोहरु इत्यादि॰ शोभेव लक्ष्मणमुखं वनमालेव विकटहरिपतेरुरः। की
र्त्तिरिव पवनतनयं आज्ञेव बलान्यस्य विलगति दृष्टिः। अस्य रामस्य दृष्टिर्लक्ष्मणमुखं विलगति संबध्नाति शोभेव दर्शी
नानंतरमेव मुखप्रसादात्। हरिपतेः सुग्रीवस्य विस्तीर्णमुरः। वनमालेव पौरुषाध्यवसायनिमित्तं सम
स्तवक्षस्तलविलोकनाद्बलश्यामलया दृष्ट्या वनमालेव। प्रमाणावसरे प्रभुणा सुग्रीवाय प्रसादीकृतेति भावः। पवन
तनयं हनूमंतं विलगति कीर्त्तिरिव। तस्य ज्ञातपौरुषस्य विकसितया धवलितगगनया दृष्ट्या निरीक्षणं कृतमिति भावः
बलानि विलगति आज्ञेव। तदनंतरमेवातिबलानां तेषां गमनोद्योगात्। आपादप्रवणां मालां वनमालेति तां विदुरिति
शाश्वतः। मुखादेराधारस्येव कर्मता। यद्वा उपसर्गेण धात्वर्थो बलादन्यत्र नीयत इति सुतरामस्या विलगतेः सकर्मकता।
इह रामदृष्टेः शोभाद्युपमानमालया सूत्रेण ग्रथनमेव विस्तरेणोपमितेर्मालोपमेयं। न चेयं बहूपमा॰ एकस्य धर्मस्य
बहुष्वनिरुपस्थितत्वात्॥ ॥ चंद्रेत्यादि॰ अयं हंसः श्वेतदीप्त्या ज्ञायते चंद्र इवाचरति। प्रियामनोज्ञगमनेन हंस इवाच

चेत्यादिहेतुमत्वं र

रति। वारि जलं स्पर्शसुखेन कांते वा चरति। विहायो गगनं निर्मलत्वात् यावारीयते जलमिवाचरति। वार्वारि जलमित्यमरः।
पुंस्याकाशविहायसी इति च। इह पश्चार्द्धलनापूर्वापेक्षत्वात् तयात्ल्लुङ्घंटिकाक्रमः। प्रपंचवक्रं रूपं प्रतीत्युपमावाक्यं चस्फु
टमेव। तर्हि प्रकृतरूपता कथं स्यादत आह तयेति। उपमाप्रपंचात्यावैकवाक्यत्वविधाने नशारदस्य त्वर्णने नप्रकृतरूपते
ति भावः॥ ॥ तुरीयां चतुर्थी चतुरएमता वाच्यक्षरलोपश्चेति ङः॥ यदित्यादि हे प्रिये मम वक्त्रसादृश्यस्पर्द्धमात्रमपि नदै
वेन लभ्यते॥ यस्मान्नेदिंदीवरं जले मग्नं। कीदृशं त्वन्नेत्रसमशोभं। चंद्रो मेघैरंतरितश्छन्नः। कीदृशः त्वन्मुखप्रतिबिम्ब
सदृशः। तेपि राजहंसा गताः येत्वद्गतितुल्यगमनाः। इह प्रसिद्धिविपर्ययेणोपमितेर्विपर्यासोपमा॥ ॥ तवेत्यादि
हे प्रिये त्वां कथं तु लज्जसे मदिहि। कीदृशीं पद्मिनीकदंबनिलीनां स्थितां। मुखेनापि न लज्जसे इत्याह तव मुखमिव पद्मं पद्ममि
व तव मुखं। इह प्रथमपद्ये प्रसिद्धिविपर्यासेन क्रमेणोपमानोपमेययन्नावाङ्मयोपमेयं॥ ॥ तन्नावित्यादि विकृतोयं श्लेष
गुणे। इह यद्यपि पतेतामित्युपमानात्तस्योत्पाद्यतयोपमुत्पाद्योपमा। अनेकेषामुपमितेः प्रपंचोपमात्वं॥ ॥ तदित्यादि
विकृतोयं लाटीयानुप्रासे। इहान्यात्वत्सदृशी नेत्युपमानांतरसंबंधाभावोऽनन्वयः। तर्ह्युपमितिः कथं तस्या नेदग
नेत्वादत आह एकस्यापीति तथाप्यात्मनो भेदकल्पनाद्दोषः। औपम्येन उपमेयस्यार्थिकः छन्न॥ १॥ रूपकल
क्षणमाह यदेति यदा उपमानपदानां पद्मादीनामुपमेयेषु मुखादिषु वृत्तिर्बोधकतान्नेवेरं तदा रूपकं। कथमन्य
स्याद्बोधकताऽतिप्रसंगादत आह गौणेति। गौणवृत्तिर्गौणी तदाश्रयणात् तथा च गौण्याऽन्यस्यान्यबोधकता एवं च

राम

यत्रोपमानोपमेयपदाभ्यामभेदो बोध्यते गुणादिपुरस्कारेण तत्र रूपकं यत्र सादृश्यमात्रं तत्रोपमेति तयोर्भेदः। विभागमा
ह। शब्देति। प्रथमं यावद्रूपकं द्विधा शब्दस्पृष्टमार्थस्पृष्टं तत्र यत्स्पृष्टं भेदात्। तत्र शब्दस्पृष्टं प्रकृतविकृतभेदाद्द्विधा। अर्थ
स्पृष्टमङ्गिप्रधानाङ्गप्रधानभेदाद्द्विधा। अनयस्पृष्टमपि शुद्धसंकीर्णभेदाद्द्विधेति विभागः। तत्र प्रकृतशब्दस्पृष्टविभा
गमाह चतुर्भिः इति॥ पाणीत्यादि। त्वत्पादनखचंद्राणामर्चिषस्तेजांसि रूपाणां वारकमलानि संकोचयितुं निमीलयितुमी
शते समर्था भवंति। अर्चिषः कीदृश्यः कुन्दपुष्पवदमलाः। अर्चिरिति। शिखास्त्रियामित्यमरः। पाणिः पद्ममिव नखश्चं
द्र इवेत्यत्रोपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति समासः। इह सामान्यस्यैवादेरप्रयोगेणाभेदोपचारादुपमानार्थ
स्तिरोहित इति गौणी पुरस्कारः तिरोहितत्वं च परमार्थतः सन्नपि भेदो न ज्ञायत इति। तत्तु समासेनैव व्यक्तं मतं तएव श
ब्दस्पृष्टावुपरि शब्दस्पृष्टता॥ ॥ अंगुल्य इत्यादि। हे सुंदरि त्वं नोऽस्माकं प्रत्यक्षचारिणी दृष्टिविषयः पादविहारिणी वा वसंतस्य
श्रीरसि। अभेदोपचारेवीरमाह तव अंगुल्यः पल्लवान्यासन्नखदीप्तयः पुष्पाणि आसन् बाहू लते वा बाहुद्वयं च लताद्वयं। प
ल्लवोऽस्त्री किसलयमित्यमरः। उपमातोऽभेदमाह सामान्येति। इह समासाभावाद्व्यक्तरूपकता॥ स्मितमित्यादि। हे सखि।
तव मुखेंदौ स्मितमीषद्धासो ज्योत्स्नास्ति। कुचकुंभयोः प्रभादीप्तिरंबुजलं वा अंगुलतायाः पल्लवभूते पाणौ नखदीप्तयः पु
ष्पं। नीरक्षीरांबुसंवरमित्यमरः। इत्यादिव्यतिरेकादुपमातिरस्कारः। इह प्रथमं समस्तं ततोऽसमस्तमिति समस्तव्यस्त
ता॥ ॥ हरीत्यादि। शिरसि ... वलिवंचने त्रिविक्रमदशायां ब्रह्मांडाशोच ब्रह्मणा पाद्यार्थमावर्जितं यज्जह्नुकन्यायाः

प्रस्तुतत्वं

गंगायां जलं तद्देवांशुकं वस्त्रमिव यत्र तादृशो हरेर्वामनरूपस्य पादो बलिविजयाद् असुरेभ्यो निःशंकानां देवानां हर्षोत्सवे
ध्वज एव जयति अत एव गंगाजलं मंशुकत्वेन रूपितं तेन विनाध्वजत्वानुपपत्तेः । शिरोग्रे मस्तके ऽपि चेति मेदिनीकरः । इह
पादध्वजयोर्विशेषणवतोरेव रूपणात् सविशेषणरूपकता । प्रकृतत्वेन तत्र समासादिति रेवेति प्रकृतानुरूपकता ॥ ॥ वि
कृतशार्दूलपिंछं विनजते चतुरइति विकृतस्यापि चतुरो नेदानुप्रतिज्ञानतेस्वीकुर्वंति धीरा इति शेषः ॥ ॥ व्यवसाअ इत्यादि
5 व्यवसायरविप्रदोषो रोषगजेंद्रदृढशृंखलाप्रतिबंधः । कथं कथमपि दाशरथेर्जयकेशरिपंजरो गतो घनसमयः । अत्र दा
शरथे रामस्य कथं कथमपि कष्टस्तृष्णापगनसमयो वर्षर्तु गतिः अतीतः । कीदृशः व्यवसायः कार्योद्योगः स एव रविस्तेजोम
यत्वात् तत्र प्रदोषो ऽस्तंगमनकालः । रोष एव गजेंद्रो दुर्निवारत्वात् तस्य दृढशृंखला प्रतिबंधः प्रतिबंधकत्वात् । जय एव केश
री तस्य पंजरो गृहं नेदोनियामकत्वात् । शृंखला निगडे विधिति मेदिनीकरः । इह राम संबंधि संबंधि संबंधिरूपणात् पर
स्परारूपकं । संबंधि संबंधित्वादेव विकृतत्वं ॥ ॥ किसलयेत्यादि । मदनः कामो हरिणाक्षीणां हस्तपद्मैर्लीलितानां किसलय
करैर्जगज्जयति योषितां मुखचंद्रैः पद्मिनीनां पद्ममुखैश्चैव जगज्जयति । इह रसनाक्षुद्रघंटिका तस्याः क्रमः पश्चाद्दलनया
एकैकप्रथनाशादृगता प्रतीयत इति रसनारूपकमिदं ॥ ॥ स्वामीत्यादि । मम कर्णः को वा न अपि तु सर्व एव । तदेवाह दु
र्णयस्य वारणे निवारणे यो व्यतिकर आसंगस्तत्र स्वामी प्रभुः दुर्णयनिवारक इत्यर्थः । सौर्थस्योपदेशे गुरुरुपदेष्टा । विश्रं राम
भहृदयं विश्वासपात्रं नियोग आज्ञा तत्काले दासः जयेआ अप्रश्च । तत्र समुद्रसीमान एव रसनादामं तत्र विक्रितायाश्च मेदि ५

ता। अहो आश्चर्यं सर्वाकारं यथा स्यादेवं स्वयम्वरसुहृत्सहजमित्रं च निरूपयितं स्वयंवरशब्दार्थः। हृदयमित्यजहल्लिंग
तयान्वयः। आज्ञा नियोग आदेश इत्यमरः। इह विस्तरेण रूपितत्वं मालारूपकं॥ ॥ मुखित्यादि। हे सखि तव भ्रूलताऽस्मिन्मुख
पद्मरंगे नर्तकी यूनां दृष्टीनेत्रे लीलानाट्यामृतं निषिंचति। लीलाविलास एव नाट्यं नृत्यं तदेवामृतं। इह मुखं पद्मं जेन रूप
यित्वा रंगत्वेन रूपितमेवं भ्रूवल्लतात्वेन रूपयित्वा नर्तकीत्वेन रूपिते लीलेव नाट्यं तदेवामृतमिति रूपितरूपणाद्रूप
करूपकं॥ ॥ अर्थभूयिष्ठरूपकेऽङ्गिप्रधानं विज्ञातं समस्तमिति॥ ताम्रेत्यादि। नव चरणपद्मं न्वपेर्मस्तके ध्रियते। की
दृशं ताम्रांगुलयो दलश्रेणिः पत्रपंक्तिर्यत्र तत्र नखदीधितयः केशराणि यत्र तत्र। समस्तेति यथा समस्तोपमायामवयवि
नोः सामस्त्येनोपमा तथावाप्यवयविनोरेव प्राधान्येन सामस्त्येन रूपकमित्यर्थः। अंगुल्यादौ प्रतीयमानता दलत्वादिनिषी द१
यमानता। तर्हि शब्दभूयिष्ठत्वमेव स्यादत आह तयोरिति। शब्दोपस्थापितानामर्थानामिह यथा स्थाने विनिवेशादर्थप्राधा
न्यमित्यर्थभूयिष्ठत्वमुक्तमित्यर्थः। शब्दभूयिष्ठरूपकनिदेसमस्तेऽतिव्याप्तिमाशंक्य तेन चेति। न चापि नानाशब्दोपस्थापितानां
मर्थानामवयविनोरेव प्राधान्यमतो नानयोर्भेद इत्याशयः। परिहरतीति तत्रेति। तत्राक्षिपः प्राधान्यं साक्षात्क्रियान्वयात्ल
नखचंद्राणां तु तदंगतयान्वयः। तर्ह्यक्षिपामेव रूपकत्वमस्तु तथापि सदोषस्तदवस्थ एवेत्यत आह ताश्चेति। ता अक्षिपः। पाणि
पद्मानीत्यत्र रूपकत्वे दोषतादवस्थ्यादाह पाणीति। त्रिजगीषुत्वभाववर्णनायां मुख्यत्वेनांगतया पाणिपद्माद्यन्वय इति शब्दप्राधा
न्यमेवं चरणेतु चरणादेरवयविनः प्रधानक्रियान्वय इत्यर्थप्राधान्यमिति भेदः॥ ॥ अकस्मादित्यादि। हे चंडि कोपने तत्स्फु

रिताधरपल्लवं मुखं कर्तृ अकस्मादेव कारणं विनैव मौक्तिकच्छायाधर्माम्बुकणमंजरीर्दत्ते· विनर्त्ति । अत्रापीति यथा एक
देशोपमायामवयवानां प्राधान्यं तथात्राप्यवयवानामेव प्राधान्यात् समस्तरूपकता एवं चावयविनो मुखस्य रूपणाभावादव
यवरूपकमिदमिति भावः । सहजावयवताऽधरे आहार्यावयवतां औपचारिकावयवता धर्मिणः कणस्य अवयवाश्रयत्वा
त् उपमानावयविनो लतायाश्चास्य । शब्दस्पृष्टरूपकभेदात् समस्तरूपकादस्य भेदमाह अत्रापीति इहार्थेन तु युक्त्यैव प्राधान्य
मिति भेदः ॥ ॥ स्मितेत्यादि हे सुभ्रु तवेदं मुखं कस्य न नन्दनं हर्षकमपि तु सर्वस्यैव नः शिरश्चालने । कीदृशं स्मितमेव पुष्पं ते
न उज्ज्वलं दीप्तिमत् । लोलनेत्रे एवंभूतं गीयते ततः । सुरभिः श्वासानिलो यत्र ततः । युक्तिर्योग उपपत्तिश्च तन्नयमपि विवक्षित
मिह तथाहि पुष्पभ्रमरयोर्युक्तिर्योगः पुष्पैः सह भ्रमराणां मकरंदपानकृतः संबंधः । अत एवोपपद्यते पुष्पभ्रमरयोरेकत्रा
वस्थानं न हि पुष्पाणि भ्रमरैर्विनाशितानि तदिति युक्तरूपकं तदाशयवानाह परस्परमिति । नन्दनमिव नन्दनमिति शब्दप्राधा
न्येऽपि नंदयतीति नंदनमिति हृदि निहितो भावोऽत्र व्यवतरत्प्रकाशत इति वचनादत्र प्राधान्यमेव विवक्षितमिति शंकोत्तरा
भ्यामाह पश्चादपीति ॥ इदमित्यादि हे कांते तवेदं मुखं जगन्नेत्राणामिंदुरस्माकं तापाय कथं कल्पते शक्तं भवति । कीदृशं आ
र्द्रस्मितं सरसेषद्धासो ज्योत्स्ना यत्र ततः । स्निग्धं नेत्रोत्पलं यत्र ततः । स्मितस्यार्द्रत्वेन स्नेहजनितत्वाल्लक्ष्यते कोपस्मितस्य रूक्ष
त्वात् । इह ज्योत्स्नाया उत्पलस्य च सहानवस्थानं तच्चमिथोऽनुपकार्योपकारकभावादित्ययुक्तरूपकता । अर्थप्राधान्यं प्र राम
वक्तिमुक्त्वात्रापीत्याह अत्रापीति ॥ ॥ अर्थस्पृष्टरूपकेऽङ्गप्रधानविभजनं तेन दर्शितमिति । तयोः सहजाहार्ययोर्योगस्तावे ६

गः तयोर्वैषम्यं विषमावयवता ॥ पप्फुरिअं इत्यादि प्रस्फुरितमोष्ठपुटदलं तत्र त्वचा निर्गलितरुधिरमधुविच्छर्दं । उत्खंडित
कंठनालं पतितं स्फुटदशनकेशरं मुखकमलं । इह मुखमेव कमलेन त्याति तं । कीदृशं प्रस्फुरितमोष्ठपुटमेव दलं पत्रं यत्र तत् ।
तत्कालगलितरुधिरमेव मधुप्रवाहो यत्र तत् । विच्छर्दः प्रवाहः । उत्खंडितकंठ एव नालायत्र तत् । स्फुटदशना एव केशरा
णि यत्र तत् । इह मुखस्योष्ठादिपद्मस्य पत्रादिकमवयवास्तेच सहजा इति । तत्प्राधान्यादिदं सहजावयवरूपकं । नच ताम्रां
गुलीत्वेनावयविशेषणेनास्याभेद इति वाच्यं । तत्रांगिप्राधान्यस्य विवक्षितत्वादिहांगप्राधान्यस्य तत्त्वादित्याह । नचेति ॥ ता
इत्यादि । ततः कुंभकर्णप्रतिवचनदंडपरिघट्टितामर्षघोरविषः । गलितांशुकनिर्मोको जातो भीषणतरो दशाननभुजगः ।
इह अनंतरं दशानन एव भुजगः सर्पः सोऽतिभयानको जातः । कीदृशः कुंभकर्णप्रतिवचनमेव दण्डस्तेन परिघट्टित उत्था
पितोऽमर्ष एव घोरविषो यस्य सः । गलितमंशुकं वस्त्रमेव निर्मोकः कंचुको यस्य सः । समौ कंचुकनिर्मोकावित्यमरः ॥
इह प्रतिवचनादीनामवयवत्वानावादाहार्यावयवता । तेषामेव च प्राधान्यादाहार्यावयवरूपकमिदं ॥ ॥ यस्या इत्यादि ।
सा मम मत्तल्लेवलताहे हत्थत्यादर्शनापरशुना ल्लूयतां । छिन्द्यतां । त्वच्चरणाहेणोभयपरशुः कुठारः । यस्यास्त्वल्लालतायाः अहंकृ
तिरहंकार एव वीजं मादिकारणं गुरुतरो ममेति ग्रहो ममत्वनिश्चयो मूलं नित्यमिदमितिस्फूर्तिरंकुरः पुत्रमित्रमित्यादयः कि
सलयाः दाराणां पत्नीनां परिग्रहोऽनुरागः स्कन्धः परिभवः पराभवः कुसुमं दुर्गतिर्नरकं फलं । सर्वत्र यस्या इत्यन्वयः । तरुश
कांडे स्कंधो नेति विश्वः । नरको निरयो दुर्गतिः स्त्रियामित्यमरः । इह बीजादीनां सहजावयवता अहंकृत्यादीनामाहार्यावय

वत्ता। तेषामेव च प्राधान्यं विवक्षितमित्युभयावयवप्रधानकमिदं। श्रीव्यं नित्यता॥ ॥ मदेत्यादि॰ हे प्रिये लग्नमुखेंदु नाम मयोऽनुवन्
त्रये मंदस्मितं जेतुम[illegible]र्थास्मि। कीदृशेन मदरक्तौ कपोलौ यत्र तेन। नर्त्तितभ्रूलतियेन तेन। इह मुखमवयवि चंद्रत्वेन रूपितं
भ्रुवौ चावयवौ लता[illegible]गंडस्थकनकेनापीति वैषम्यं प्राधान्यं चावयवानामेवेति विषमावयवरूपकता॥ ॥ शब्दार्थद्वयिष्ठरू
पके शुद्धरूपकं विभजते आधारवदिति॥ सोहमित्यादि॰ शोभते विशुद्धकिरणो गगनसमुद्रः रजनिवेलालग्नः। तारामुक्ताप्रक
रः स्फुटविघटितमेघशुक्तिसंपुटमुक्तः। इह गगनमेव समुद्रस्तत्र तारा एव मुक्तास्तासां प्रकरः समूहः शोभते। कीदृशः
विशेषणातिशयेन शुद्धकिरणः। रजन्येव वेलातीरस्थमिस्त त्रलग्नः संबद्धः। स्फुटविघटिता व्यक्तीकृत्य विदीर्णा मेघा एव शु
क्तिसंपुटास्तैर्मुक्तश्च। इह साहश्ये रजन्यादीनां प्रतीयमानता। वेलादीनामभिधीयमानता। शुद्धरूपकता उपमाद्यसंभेदा
त्। गगनस्याधारतयेदमाधारवद्रूपकं॥ ॥ वनेत्यादि॰ वनराजिकेशहस्ताः कुसुममायुधसुरभिसंचरद्भृङ्गपटाः। श
शिकरमुद्भूतिमेघास्तमः प्रतिहस्ता विज्ञायंते धूमोत्पीडाः। इह धूमसमूहाः एतादृशो विज्ञायंते कीदृशाः वनराज्या वन
पंक्तिः केशहस्ताः केशकलापा एव। पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः। कुसुमायुधस्य कामस्य सुगं
धिचलद्भृङ्गपटा एव। चंद्रकिरणानां मुद्भूतिं मेघा एव तमसामंधकाराणां प्रतिहस्ताः प्रतिनिधयः। प्रतिहस्तः प्रतिनिधा
विति विश्वः। इह धूमोत्पीडस्य वनराजिकेशकलापादेराधारत्वानुपपत्तेर्निराधाररूपकमिदं॥ ॥ वलितेत्यादि॰ न वेदं राम
वदनपंकजं कल्मदावस्थां मद्यपानजां दृशां विघूर्णितं प्रकाशयति। कीदृशं वलितेन नर्त्तितभ्रुवो यत्र तत्। आलोहितेऽ

तिरक्तेर्ईक्षणीयस्यतत्।इहमुखपद्मरूपस्यावयविनः केवलस्यरूपणात्केवलरूपकमिदं॥ ॥अनेत्यादि अनघमनवद्यं·
तस्यारूपमिहभुविकंभोक्तारंसमुपस्थितंकरिष्यतीतितदहंनजाने।कीदृशंअनाघ्रातमगृहीतगंधंपुष्पमिव।कररुहैर्नखैरलून
मखंडितंकिसलयं।अनाविद्धमपरिहितंरत्नं।अनास्वादितरसमगृहीतास्वादंनूतनंमधु।पुण्यानांचाखंडंसकलंफलमपि·
।आविद्धःपरिहितेक्षिप्तेइतिविश्वः।इहपुष्पादीनामनाघ्रातादिनाव्यतिरेकवतांरूपणाद्व्यतिरेकवद्रूपकमिदं॥ ॥शाद्वा
र्थेरूपिछरूपकेसंकीर्णरूपकंविनज्ञेतेऽथेति।आकृयोनाम।सर्वमेकीकृत्यगणयतिसेषेति·चतुर्विंशतिरित्यर्थः॥ ॥रइअ
वेत्यादि·रविकरकेशरनिकरंशोणतेषवलाग्रदलसहस्रपरिगतं।मधुमथदर्शनयोग्यंपितामहोत्पत्तिपंकजमिवनजस्त
लं।इहनजस्तलंशोणंतेपितामहस्यब्रह्मणउत्पत्तिपद्ममिव।तस्यपद्मयोनित्वात्।कीदृशंरविकराःसूर्यकिरणाएवकेशरनि
कराःयत्रतत्।धवलाग्राणिश्वेतमेघाएवदलसहस्राणितैःपरिगतमन्वितं।मधुमथस्यविष्णोर्दर्शनयोग्यंशारदितस्यजागर
णादस्यचरम्यत्वात्।पद्मपक्षेपिनाभिकमलतयामधुरिपुदर्शनयोग्यतायद्वामधुमथस्यभृंगस्यदर्शनंकवलनंतद्योग्यं।मधुं
मथ्नातीतिमधुमथःस्थूलविष्णुजातित्वात्कः।मधुमथौहरिभृंगयोरितिशाश्वतः।अत्ररविकरधवलाग्रसहस्रयोःसहजाहार्या
वयवयोःकेशरनिवहत्वेनदलसहस्रत्वेनचरूपणात्पंकजनजस्तलयोरवयविनोरुपमानोपमेयत्वाच्चसावयवसंकीर्ण
रूपकमिदं॥ ॥दीर्घेत्यादि·दीर्घोदिवसभुजंगोरविबिम्बफणामणिप्रत्यंविकाशयत्र।अपरसमुद्रमिवगतोभुंचत्रकं
चुकमिवातपनिवहं।इहदिवसएवभुजंगःसर्पोऽपरसमुद्रंपश्चिमसमुद्रंगतइव।कीदृशःदीर्घःमहापरिमाणःसूर्यबि

स्वमेव करुणा मणिश्रेणां विकाशयत् आतपसमूहं कंचुकमिव त्यजन्त्यः अत्र सामानाधिकरण्येनावयवावयविनावोन्न
यतः इव शब्दयोगेन चोपमाज्ञायत इति निरवयवसंकीर्णरूपकमिदं ॥ ॥धुन्व इत्यादि· धुतमेघमधुकराः घनसमयाकृष्टा
वनतविमुक्ताः। नगः पादपशाखा निजकस्थानमिवश्रितिगता दिशः। इह दिशो निजकस्थानं स्वकीयस्थानं श्रितिगता इव।
इव पदमुत्प्रेक्षार्थं। कीदृश्यः धुतमेघ एव मधुकरा भ्रमरा यासु ताः। घनसमयेन वर्षाकालेन घ नावरणादाकृष्टाः स
न्निहितीकृता अवनता अपि लग्नाः पश्चाद्विमुक्तास्त्यक्ताः। नगा एव पादपा वृक्षास्तस्य शाखाभूताः। अत्र धुतमेघपदे बहु
व्रीहिः नगः पादप पदे षष्ठीसमासः ताभ्यां सावयवत्वं निरवयवत्वं च यथाक्रमप्रयुक्तम् एवोन्य संकीर्णरूपकमिदं·
स्कन्धकेष्वनिस्क्रान्तदिशं तीति दिशः सौढनायिकाः अन्या अपि दिशो निजस्थानमिव गच्छंति। कीदृश्यः धुतमेघं घनं मधुमदं·
तत्करेयासां ताः यद्वा धुतामेधा वृद्धिर्येन ताद्दशं मधुकरे यासां ताः। यद्वा धुतामेधा यस्मादेवंविधो मधुकरो विदग्धो यासां·
ताः। घनेन दृढेन समयेन शपथेन समदेन पुंसा वा आकृष्टा आहृता अवनता वशीकृता उपभुक्ता इति यावत् पश्चाद्विमुक्ता
स्त्यक्ताः। यद्वा विमुक्ता विगतमुक्ताहाराः पश्चात्कर्मधारयः। समयः शपथे काले इति विश्वः। नखस्य पातः क्षतं तदेव प्रसा
धः प्रसाधनं यासां ताः॥ ॥पीणेत्यादि· पीनपयोधरलग्नं दिशां प्रवसता जलदसमयेन वितीर्णं। शोणाभ्रप्रथमचिह्नं प्रक्षा
यति सरसनखः पदमिव धनुः। इह इंद्रधनुः प्रक्षालयति प्रवाययति क्षिप्यति वा कीदृशं पीनेन पयोधरेण मेघेन लग्नं प्रवसता राम
कृता जलदसमयेन वर्षाकालेन दिशां वितीर्णं दत्तं शोणयाऽभ्रेण छं प्रथममाद्यं चिह्नं। सरसेनाद्रेण नखेन गगनेपदं स्था ८

नेयस्यंतत्र। पदेसरसं नखपदं क्रमेण श्लाघयति। कीदृशां दृशां प्रौढांगनानां दृश्यानां सुंदरीणां वा पीनमांसले पयोधरे स्तनेल
ग्ने। प्रवसता जलदसमयेन नायकेन वितीर्णं दत्तं। जलानू घूर्णीनू घातिखण्डमति जलदः ईदृशः समय आचारो यस्य सः। सोना
ग्यस्य प्रथमं चिह्नं इंदुधनुराकारं च। समयः स्यात् कालआचारे इति शाश्वतः। प्रवासगमने स्मरणार्थे विदग्धेन नखक्षतं देयं त
दुक्तं मल्लिकसर्वस्वे प्रवासगमने देयाः स्नेहसंस्कारकानखाः। चिरोत्सृष्टेषु रागेषु प्रीतिर्गलितपरान्नवं। रागायतनसंस्मारि
यदि नस्यान्नखक्षतं। रेखास्ति प्रश्रत्रु प्रश्नव काव काहृति नेखद्दति। अत्र श्लेषालंकारेणोपहितत्वादेवसंकीर्णरूपकता॥ २१॥
साम्यलक्षणमाह द्वयोरितिद्वयोरुपमानोपमेययोर्यत्र वचनरचनाभेदाद्य ओपम्यार्थस्तुल्यता ज्ञायते तत्साम्यमामनंति ज्ञानं
ति। नत्विह उपमारूपकयोरतिव्याप्तिरत उक्तमुपमेति यद्यपि त्रिषु साहश्यमस्ति तथापि प्रकारकृतो भेद इति भावः। तद्भिन्न
ते तस्य विवृति। यद्यपि भेदानामानेत्यात्संख्यं तत्साम्यं तथापि तिस्र उक्ताः प्रकारा अनुगामकास्तत्रेत्यर्थः। वस्तिति वस्तु वाक्यं
किमथ्रकपदस्य तत्त्वधर्मेण स्तेन तुल्यगुणस्य न्यस्य नाडुदाहरणात् साम्यज्ञानं प्रतिवस्तूक्तिरित्यर्थः। पूर्वोदीत्यादि पदेनोक्त
रग्रहणं। क्रियायोग एव निमित्तं तत्रैव साम्यं॥ स्थित इत्यादि सम्भूपति हिलीपस्तां सुरभिमनुगच्छत् अनुगच्छति स्म। अनुगमन
मेवाह स कीदृशः स्थितो वस्थितः उच्चलितः प्रस्थितः आसनवान् उपविष्टः जलाभिलाषी जलेच्छुः जलाभिलाषीति पाठे लाद
नेताक्रीलिकाणीनि आतोयुष्णिति युक्ति जल पानशील इत्यर्थः। तां कीदृशीं स्थितां प्रयातां कृतगमनां निषण्णां उपविष्टां जलमा
ददानां गृह्णतीं च। छायेव यथा छायाक मध्यनुगच्छति तथेत्यर्थः। एतासां क्रियाणामेकचित्ततयानुगमार्थं धीर इत्युक्तं। ननु छाये

वसइतिलिंगभेददोषदुष्टमेवेदमतः कुतोलंकारतेत्यत उक्तं अनाविष्टेति अविवक्षितलिंगत्वात् नहिलिंगविवक्षायामिह
किंचित्प्रयोजनं। इयं चोपमा लौकिकी लोके च छायायाआवरकात्तु गमनेयत्वं नत्वन्यस्येति। तावन्मात्रमेवोद्देश्यमिहेतिनदो
षः तदिदमुक्तं अवश्येति। सर्वक्रियया प्रथमत एव सास्यात्पूर्वं यं। उपमायामेक एव वाक्यार्थः इह तु वाक्यार्थयोर्भेद इति
भिन्नालंकारता॥ ॥ सञ्जलु इत्यादि सकलोद्योतितवसुधेसमस्तजीवलोकविस्तीर्यमाणप्रतापे। तिष्ठति न चिरं रवावि
वविधानपतितापि मलिनता सत्पुरुषे। इह सत्पुरुषे मलिनता चिरं न तिष्ठति। कीदृशे सकलोद्योतितावसुधायेन
तस्मिन्समस्तेजीवलोके मर्त्यलोके विस्तीर्यमाणः प्रतापो यस्य तस्मिन्। मलिनता कीदृशी विधानेन इति कर्तव्यतया विधिना वापा
तिता उत्पादिता। रवाविव यथा सूर्ये मलिनता चिरं न तिष्ठति तथेत्यर्थः। कीदृशे सकलोज्वलीकृतवसुधे समर्थिते लोके विस्ती
र्यमाणः प्रतापः प्रतपनं यस्य तस्मिन्। मलिनता कीदृशी विहाणं प्रातः तस्मात्पतितापि। इहासाधारण्यमेव विशेषः। पूर्वतापि
समस्तक्रियया प्रथमतः साम्येन॥ ॥ रूपमित्यादि कुमारो बालको ऽजः स्वात्रिजातकारणात् पितुर्नेविजिदेन नेदं जगाम। अ
भेदहेतुमाह अजस्यदीप्तं तद्रूपं सौकुमार्यं तदेव वीर्यं तेजः। तथैव नैसर्गिकं स्वाभाविकमुन्नतत्वमुद्धितत्वं च। यथा दीपात्प्रव
र्तित उत्पादितो दीपः स्वात्कारणाद्दीपान्न भिन्नो भवति। अत्रापि रूपादिकं तुल्यमेव। दृष्टांतस्य प्रकृतवाक्यार्थपर्यवसाने सतिप
श्चादन्वय इत्युत्तरता॥ ॥ अस्खलितमित्यादि अव्यवच्छिन्नप्रवृत्तोधिकमुज्ज्वलति स्फुरितस्त्वरच्छायः। उत्साहः सुभटानां विषमस्ख राम
लितो महानदीनामिव स्रोतः। इह सुभटानामुत्साहो विषमे दुःकरे स्खलितः सन्नधिकं यथास्यादेवं तद्भावति प्रकाशते। कीदृ ८

* न तत्रुधिरमिव महोदधेर्विद्रुमपीठं । इह वहलधूमोत्पीडो महाधूमसमूहो विषवेगाद्वपुस्ततो यद्यद्विद्रुमपीठमभिलीयते अभिलाति यद्वा नि वा न त्र महोदधे विद्रुमपीठं श्यामलायते ५ *
श: अव्यवच्छिन्नो निरंतर: सन् प्रसृत: स्फुरितास्तरस्य स्तुनटस्य सौर्यस्य वा छायाख्याति: कांतिर्वा यत्र स: । यथा महानदीनां श्रोत:
प्रवाहो विषमे देशे स्खलित: सन्नधिकमुद्भावत्तिं उज्झति. सोपि निरंतरप्रसृत: स्फुरितास्तरस्य छायाकांति: प्रतिविंवो वा यत्र
स: । प्रतिविंवे च कांतौ च ख्यातौ छायार्कयोषितीति मेदिनीकर: । कार्यारंभेषु संरंभ: स्तुत्या तूत्साह उच्यते इति नरत: । अत्र ताद
शानदीश्रोतसो विशेषरूपता ॥ ॥ विसत्यादि विषवेगाद्वपुस्ततो यद्यद्दभिलीयते. अभिलाति वा वहलधूमोत्पीड: । श्याम
लायते कज्जलीभवति । कीदृशं. रुधिरमिव. इयं पूर्वं दशा । अभिलीयत इति अभिपूर्वात् लीङ् आश्लेषे. दैवादिक: स्यादुत्पीड:
समूहे पीतिरत्नकोष: । अत्र जातेर्द्रव्यस्य सामान्यत एव साम्यमिति सामान्यरूपता दृष्टांतस्य पूर्वमुपन्यासात् पूर्वता च ॥ ॥
संचारिणीत्यादि· सा पतिंवरा इंदुमतीयं यं भूमिपालं व्यतीयाय. तत्याज. स स भूमिपालो विवर्णभावं विवर्णत्वं प्रपेदे लेभे । यथा
रात्रौ संचारिणी दीपशिखा यं यं राजमार्गाट्टं व्यतिक्रामति. स स राजमार्गाट्टो वैवर्ण्यं प्राप्नोति तथेत्यर्थ: । व्यतीयायेति. व्यतिपू
र्वात् इण गतौ. लिटि रूपं । अट्टोऽट्टारीति प्रसिद्ध: । स्यादट्ट: क्षौममस्त्रियामित्यमर: । इह संचारणत्वसामान्ययोगात् सामान्य
रूपता. राजमार्गाट्ट इति विशेषरूपता ॥ ॥ उज्ज्वलेत्यादि· त्वया त्यक्ता स्निग्धा स्नेहवती सखी न राजते । इति प्रियाया: सखीप्रति
पत्तुर्वचनं । त्वया कीदृश्या उज्ज्वलो निर्मल आलोको दर्शनं यस्या: तया । स्निग्धा कीदृशी मलीमसं म्लानं मुखं यस्या: सा । यथा प्र
दीपशिखया त्यक्ता वर्त्तिर्न शोभते. तथेत्यर्थ: । शिखया कीदृश्या उज्ज्वल आलोक उद्योतो यस्या: तया । वर्त्ति: कीदृशी स्निग्धा स्नेह
वती स्नेहसैलं म्लानमुखी च । मलीमसं तु मलिनमित्यमर: । इह नायिकाशिखयोर्द्रव्ययोरयोग: दृष्टांतस्य सामान्यरूपता प्र

श्चादुपादीयमाननताचव्यक्तैव ॥ ॥ तांताणेत्यादि· तत्तस्तेषांदृतच्छायंनिश्चललोचनशिखंप्रेषितप्रतापं। आलेख्यप्रदीपानामिव
निजकंप्रकृतिचटुलत्वमपि विगलितं। इहृततत्तेषांवानराणामालेख्यप्रदीपानामिवनिजकमात्मीयंप्रकृतिचंचलत्वमपिवि
गलितमपगतं। दृताच्छायाप्रतिष्ठाकांतिर्वीयत्र· तत्त। पद्देदृताच्छायाआतपाभावरूपायत्र· तत्त। निश्चलंलोचनमेवशिखायत्र· त
त्प्रेषितोंतर्गतःप्रतापःपौरुषंप्रतपनंचयत्र· तत्· क्रियाविशेषणत्रयमिदं। निजमात्मीयनित्ययोरितिविश्वः। स्वार्थिकःकप्र। अ
तच्छायादेर्गुणस्य क्रियाविशेषणतयाक्रियायागुणायोगः। प्रदीपस्यदृष्टांतइतिविशेषं·उत्तराबव्यक्तैव ॥ अपेति· उप
यत्रसाम्यमात्रस्योपजीवनादितिभावः। लौकिकाःलोकविदिताःपरीक्षकाःप्रमाणेनव्यवहारिणःबुद्धिसाम्यस्योनयत्रतुल्य
त्वाद्दाहेनकश्चिदिति अभेदएवेत्यर्थः। तस्मिन्नेदएवनेत्याह· उक्तिमितिवचनरचनयां नेकेनेदात्तयोरित्यर्थः। साध्येतिसाध्यो
धर्मःसिसाधयिषितः। साधर्म्येतिसाधर्म्यंसमानधर्मितातत्स्यानिमित्तंगुणादिःतयोःसिद्धिरित्यर्थः। इवादिप्रयोगपुरस्कारेण
शब्दालंकारतांसाम्यादिपुरस्कारेणचार्थालंकारतेत्युनयालंकारतेत्याह· अत्रइति ॥ ॥ प्रपंचोक्तिंलक्षयतिं साम्येति· उपमा
नोपमेययोःसाम्येनउत्कर्षेणापकर्षेणचप्रपंचोक्तिःसाचक्वचित्स्वकृतास्वभावसिद्धाक्वचिदिकृताऔपाधिकी ॥ अरण्येत्यादि
तस्यांगौर्यांचतथातेनप्रकारेणहरिणादिशाश्वस्तुःविश्वासंजग्मुः। कीदृशाः अरण्यबीजस्यंजेरीतिख्यातस्यांजलिदानेनलालि
ताविलासिताःतदंजलिस्थनीवारधान्यजक्षकाइत्यर्थः। यथासागौरीनदीयेमृगसंबंधिनिनेत्रेरथेसखीनांलोचने· अमिमी राम
तसमीचकार· कौतुकात्। अरण्यबीजानियस्यतदरण्यबीजं। विशश्वस्तुरितिविपूर्वात्श्वसप्राणनेलिटिडुसिरूपं। अमिमी १०

तेति माङ्मानेणि चिलुडि चडि रूपं। इह हे विकृततया मृगलोचनानां सरःसु सौकर्यात्। अत एव प्रकृततां प्रपंचोक्तितानुद्यवादेर
प्रयोगात्॥ ॥ गर्वमित्यादि। नतु हे नायिके लोचनद्वयेनाम्भोरुहं प्रगाढं गर्वं न्यग्भावं गमयन्ती त्वं किं वहसि न वोढुमर्हतीत्यर्थः। दि
शि दिशि प्रतिदिशं सरस्सु तडागेषु ईदृशानि त्वन्नेत्रतुल्यानि नीलोत्पलानि संति। अत एव गर्वभंगः। स्यान्मर्द्दनं संवाहनमित्य
मरः। इह नीलोत्पलानामुत्कर्षः साहजिक एव नेत्रद्वयापेक्षया तेषां बहुत्वात्॥ ॥ अन्यतरेत्यादि। हे सरले कांतमुखप्रकृतिके
आननं मुखं मुहूर्तमन्यतोऽन्यत्र नय प्रापय। अत्र हेतुः एष चंद्रः कलामयः कदाचन कपोलयोर्मलं संक्रमय्य मेलयित्वा मा
समनं सामर्थ्यं नयिष्यति प्रापयिष्यति। अन्यस्यान्यत्र संक्रमणे कलामयत्वं हेतुः। अन्यतरदिति सप्तम्यां तसिः। इह चंद्रस्योपमा
नस्य कलंकरूपमलसंबंधकृतोऽपकर्षः साहजिक एव ज्ञायते॥ ॥ आपातेत्यादि। हे आपातमात्ररसिके एतत् तरुणमा
त्र रसवशे हे नायिके सरसीरुहस्य पद्मस्य वीजं वापिकायामर्पयितुं क्षेप्तुं किमिच्छसि किंतु नेदमर्हतीत्यर्थः। अत्र हेतुः अ
यं कालः कलिः कलियुगाख्यः अत एवेदं जगत् कृतघ्नं अमर्यादं ततो हे अङ्गे स्थित्वा कालांतरे इदं सरसीरुहं तदेव मुखस्य
लक्ष्मीं शोभां मथ च संपदं हरिष्यति ग्रहीष्यति जेष्यतीति यावत्। आपातः पुंसि तत्काल इति मेदिनिकरः। मर्यादावान् कृतज्ञ इ
ति चात्र पद्मस्योपमानस्य मुखादुपमेयात् किंचिदुत्कर्षः साहजिक एव विवक्षितः॥ ॥ गरिणीत्यादि। गृहिण्या महानस
कर्मलग्नमसीमलिनितेन हस्तेन। स्पृष्टं मुखं हसति ते चंद्रावस्थां गतं पत्या इह कयाचिन्नायिकया चंद्रेण स्पर्द्धमानया पाकास
क्तया श्यामितहस्तेन मुखे स्पृष्टे सति नायकस्तन्मुखस्य चंद्रसमत्वं सूचयन्नुपहसतीति काऽपरस्यै कथयति गृहिण्या इति।

गृहिण्याः पाकक्रियालग्नस्य मनागश्यामितेन करेण स्पृष्टं मुखमत एव चंद्रावस्थां गतं पत्याहस्यते। पाकस्थानं महानसेइ
त्यमरः। अत्र मसीमालिन्यं वै कृतं तत एव मुखचंद्रयोः साम्यापत्तिः॥ ॥ रक्तोत्पलेत्यादि॰ रक्तोत्पलदलशोभा कयापि चषू
के सुराभिवारुणी नरितें मदात्ताम्राभ्यां मनोहराभवति मापत्तिताभ्यां लोचनाभ्यां लघुलघुकृतां इह. कयापि नायिकया लो
चनाभ्यां च चषके सुगंधि मद्यं दृष्टे. भवति मयापतितविम्बेन पतिताभ्यां मंत एव मदेनात्ताम्राभ्यामत्ति लोहिताभ्यां मनोज्ञा रक्तो
त्पलदलस्य शोभा लघुलघुकृता अत्यल्पाकृतां जितेति यावत्। चषकं पानपात्रं स्यादिति हारावली। सुरावरुणात्म
जेत्यमरः। नरित इत्यत्र वाकुलकात् पाक्षिक इडागमः। यद्वा नरितः संजातनरः तारकादित्वादितच्। प्र तिविम्बं
प्रतिमेत्यमरः। अत्र नेत्रयोरुपमेययोर्मदात्ताम्रत्वं वै कृतमुत्कर्षः स्फुट एव॥ मृगांकमित्यादि॰ हे सखि तस्य चं द्रस्य ततो
मुखादियान् एतावान् अपकर्षः। तमेवाह. मृगांकश्चंद्रोंके क्रोडे सदा सकलं मृगं विभर्ति तस्याः पुनर्मुखं कर्तृ. कपोल
देशे मृगनाभेः कस्तूरिकायाः पत्रं पत्रावलीं कदाचिदेव हरति। इह. मुखस्योपमेयस्य वाचनिकी. वचनता त्वयैपर्थवसन्ना॰
ऽपकर्षापत्तिः कलंकिनामसमनयोरल्प एव इति हि वचनमपकर्षबोधकमेव. विकृतता च कस्तूरीपत्राधानात्।
॥ नमर्त्येत्यादि॰ विहतोयमनावालंकारे। इहोपमेयस्य मर्त्यलोकस्य यथोक्तधर्मस्याग्रे वल्लभमरणाभावरूपस्य
योगिसत्युपमानेन त्रिदिवेन तौल्यमग्रे त्रिदिवस्य योजननिहत्सुत्कर्ष एव ज्ञायते। वल्लभस्याग्रे मरणाभावाशंस

राम ११

भेद २

नयाविकृतता ॥ ॥ प्रतिवस्तूक्तेर्निदर्शनाकारानाहं प्रतीतिं सा प्रतिवस्तूक्तिर्दृष्टान्तोक्तिप्रपञ्चोक्त्योश्छायां बिभ्रती गाहते विन
त्ति । तयोश्छायावाहिनीत्यर्थः ॥ ॥ तन्मन्य इत्यादि । एतस्याः एतन्मुखं यदि भवति मुखानि कर्दमेन विलयं तेन तदा हिमजासख्य
नुरुस्य कान्तिस्फारा रात्रिकरेण उच्छेद्य इत्यहं मन्ये इह कम्मोत्रमितिरध्याहार्या । विजयं तत इत्यत्र विपराभ्यां जेरिति तङ् । अत्र प्रथ
मनृजूक्त्या दृष्टान्तः पश्चाद्दार्ष्टान्तिकमृजूक्त्यैव प्रतिवस्तूपन्यासं तु तथा च दृष्टान्तोक्तिच्छायाव्यक्त्यैव विधिमुखतापि व्यक्तैव ॥
॥ शुद्धेत्यादि । यच्छ्राश्रमवासिनो जनस्य वपुरिदं शुद्धान्तेऽन्तःपुरे दुर्लभं अस्ति तदा खलु निश्चयेन वनलता लिरुद्यानलतागुणैर्दू
रीकृताः सन्ति । शुद्धान्तश्चावरोधश्चेत्यमरः । अत्र शुद्धान्तदुर्लभपदेन ईदृशं रूपमन्तःपुरेऽपि नास्तीति वक्रोक्त्या प्रतिपादितं
पूर्वं दार्ष्टान्तिकं उत्तरार्द्धेपि वक्रोक्त्यैव दृष्टान्तकथनमिति दृष्टान्तोक्तिच्छायत्वं विधिता तु स्फुटैव ॥ ॥ नमालतीत्यादि । मालती
मालाविमर्दयोग्या नास्ति अतिमृदुत्वात् नहि नवं नवीनं प्रेम अपराधान्सहते । केसरस्रक् बकुलमाला म्लानापि सती न म्ला
यति अतिमलिना न भवति तद्वत् देवी कथंचित् खंडनया न खंडितप्रश्रया न भवति । नयो नवीनो जिनवदित्यमरः । अत्र दृ
ष्टान्तोक्तिच्छायया निषेधः पूर्वत्र मृदुत्वं च स्फुटमेव ॥ ॥ मातुषीषित्यादि । विद्रुतोयमनावालंकारे । अत्र कथं वास्यादिति
वितर्कोत्र तया वक्रोक्तिविशेषरूपा उत्तरार्द्धे तादृशज्योतिषो प्रमावसंनवे अतिरूपवत्याः प्रमावसंनवं उक्तमिति वैय
धिकरण्यं वक्रता च ॥ ॥ तरंगयेत्यादि । हे अंगने रूपवति दृशो नेत्राणि तरंगय चंचलानि कुरु तन्नतो नीलमिंदीवरं प्रपञ्च प
तत् नंगवद्भवतु । रदच्छदं दशनान् स्फुटीकुरु व्यक्तीकुरु तन्नतो विद्रुमः प्रवालः रत्नाः श्वेततां व्रजतु यातु । क्षणं मुहूर्त्तं मात्रैव

छादकमधरं

पुः शरीरमपावृणु निरावरणं कुरु। ततः कांचनं कनकं कान्तिं कांश्यामिकां स्पृशन्तु मनाक् अल्पं यथास्यादेवं मुखमुदंच
यंच तोलय च तत्तोनन्नः आकाशं हि चेंदुं चंद्र इयान्विते नवत्तु। तरंगयेति तरंग शब्दात्तत्करोतीति णिचि लोटि रूपं। ऊर्ध्वं वेतु
रदनच्छदाविल्यमरः। विद्रुमो नाप्रवाले पीतिमेदिनिकरः। कालिकां श्यामिकां च च्छोरितिशाश्वतः। द्वौ चंद्रौ यत्र तद्द्विचंद्रं
। अत्र विकृततया प्रकृततया च प्ररूपं चोक्तिच्छाया। वैकृतमसाहजिकं। प्राकृतः सहजः। विधित्तानुयत्नैव॥ ॥ एकैकैइत्या
12 दि। एकोन्नामितभ्रूलतं गविमलकपोले वदने तव मृगाक्षि तिर्यङ्नयने। एतच्छशिबिम्बं कलंकांगारं पांडरमुत्तरक्षितमुपरिश्रा
मयित्वा निर्मंछनकर्परे। इह हे मृगाक्षि तव वदने एतत् शशिबिम्बं निर्मंछनकर्परमुपरिश्रामयित्वा उत्तरक्षितं। कीदृशे व
दने एकउन्नामितउत्तोलितो भ्रूलंगो यत्र तस्मिन्। विमलो कपोलो यत्र तस्मिन्। तिर्यक् नयने यत्र तस्मिन्। एतादृशस्य निर्मंछन
मुचितमेव। शशिबिम्बनिर्मंछनकर्परधर्ममाह कलंक एवांगारो यत्र तत् पांडरे श्वेतं च। अंगारोलातउन्मुकमित्यमरः।
कर्परोऽस्त्री कपाले पीतिमेदिनिकरः। अत्रोपमेये वदने भ्रूलंगादेर्विकृतत्वं। शंकाद्यः स्फुटः। उत्तमस्य निर्मंछने क्रियत
इत्युक्तिसंगी॥ ॥ दातार इत्यादि यदि दातारः संति तदा कल्पशाखिभिः कल्पवृक्षपंचकेरलं निःफलं दानस्य दातृभि
रेव निःपादनात्। यद्यर्थिनो याचकाः संति तदा तृणैः किं याचकानामेव तत्प्रणकाधिकरत्वात्। एवमन्यत्रापि। चेद्य राम
दि संतः सज्जनाः अमृतेन किं खलाः दुर्जना यदि तत्तदा कालकूटेन विषेण किं। हशोने त्रस्य पंथानं मार्गं यदि प्रिया १२
एति आयाति तदा कर्पूरशलाकया कर्पूरघटितकाष्ठिकया किं। कर्पूरांजन्या वा किं संसारेपि सति विद्यमाने तस्मा

सदन्

दपरमिंद्रजालमस्ति.तेनापि किं सकलेंद्रजालात् संसारस्य महत्वात्।चंद्रादिकाष्ठं अन्योः शलाकेति मेदिनीकरः।अ
वदातत्वभ्रष्टते रूत्कर्षे उपमाने च निषेधका व्यूक्त्यैव॥ ॥तद्वक्त्रमित्यादि तस्यास्तत्वासिद्धं मुखं यद्यस्ति तदा शशिकथा
नुद्गितात्तु सांतन्मुखस्यैव चंद्रत्वात् एवमन्यत्रापि।सर्वत्र तत्छब्दः प्रसिद्धो।चेद्यदि तत् रस्मिन्नमीघट्टाः सः तदा कास्तुषा
किमभ्रष्टतं।यदि तत्रैवं तदा हारितं नीलनलिनैः।यदि ताभिरोवाण्यस्तदा खिन्नस्तु मधुनित्यं।यदि ते क्रमोच.तदा क
न्दर्पधनुर्द्विक।यत्रांकिं वक्तुं मह.वदामः यत्सत्यं निश्चितं वेधसो धातुः सृष्टिक्रमः पुनरुक्तवस्तुषु हि रुक्तपदार्थे
षु विमुखव एव.तथा च तद्वक्त्रादौ सति न चंद्रादिसर्गः स्यादिति भावः। अर्द्धेन्दु स्यां कवौ स्त्रियामित्यमरः। अत्र कथामु
द्गणादिना चंद्रादेरेव निषेध इति वक्रोक्तिः। शेषं प्रपंचोक्तिच्छायत्वादिकं पूर्ववत् अनुप्रासस्तु बत्तिवस्तक्तिवत्।अनयोः प्र
पंचोक्तिच्छाया कथमित्यत आह मालेति यथा मालोपमायां विस्तरेणोपमितिस्तथा त्रप्रपंचोक्तिरपि विस्तरेणैत्यर्थः
उत्पाद्येति यथा उत्पाद्योपमायामुपमानार्थमुत्पाद्योपमेये न प्रतीयमानमभिधीयमाने च साहश्यमुक्तं तथा पूर्वयोरपीति प्रपंचो
क्तिच्छायत्वमित्यर्थः॥ ३॥ संशयलक्षणमाह अर्थयोरिति अर्थयोर्वाच्ययोरतिसाम्यात् यत्र मनो दोलायते.नैकत्र स्थिरं भवति इ
दं वेदं वेति कृत्वा तं संशयमाहुः। स चैकविषयोऽनेकविषयश्च। यत्रैकस्मिन् धर्मिण्यनेकः शंक्यते.स एकविषयः यस्मिन्नाना
धर्मिण्येकः शंक्यते.सोऽनेकविषयः॥ आहारे इत्यादि हे सखि.तद्रूयाः त्वं वद नो ः किं योगिन्यसि.योगवत्यसि.किं वा वियोगवत्य
सीति। उभयसाधर्म्यमाह आहारे न स्पृहेति विरतिर्विरागः। समस्तविषयग्रामेषु रागादौ पराऽरत्यर्थे निवृत्तिः। नासायाग्रे नयने

नासिकायनिरीक्षणमित्यर्थः। एतच्चद्वपरं। यत्रमनएकतानमचंचलंध्येयेपत्योच। इदंचमौनमवचनं। इदमखिलंविश्वंय
च्छून्यमानातिसर्वत्रतत्तदेवेतियोज्यं। आहारलाघवंमौनेनासाग्रस्थवीक्षणं। मनःस्थैर्यंवशित्वंचयोगिनांविश्वशून्यतेतियोगशा
स्त्रे। नद्धेवविरागीनयनाग्रवीक्षामौनंमनोनिश्चलतावशित्वं। विश्वस्यशून्यत्वविभावनेचवियोगिकृत्यंतुनयोर्वदंतीतिनरतः। अत्र
एकस्मिन्वस्तुनिसदृशीविषयेवस्तुद्वयस्ययोगवियोगरूपस्याभिधीयमानेयत्साम्यंतस्यप्रत्यक्षाद्दर्शनात्समानधर्मदर्शनादि
तियावत्। विशेषाप्रत्यक्षाद्विशेषादर्शनाद्वनयविशेषयोर्योगवियोगयोःस्मरणाद्विमर्षःसंशयः। इहसाधारणधर्मदर्शनंविशे
13 षादर्शनमारोप्यकोटिद्वयस्मरणमितिसंशयकारणमुक्तं॥ ॥किमित्यादि। हेघनस्तनिकठिनकुचेत्वांपश्यतोममचित्तंदोला
यतेसंशयारूढंभवति। तदेवाह। अंतर्मध्येभ्रांतःहंतश्रमणोऽसिर्वेमरोयत्रतत्पदंकिं। लोलमीक्षणंचक्षुर्यत्रताद्दृशंनव
मुखंकिमिति। दोलायतेदोलेवाचरतिक्वचिद्कचपूवा। दोलाचित्तयोरुभयकोटियोगित्वेनसाम्यं। अत्रसादृश्यंप्रतीयमानं
प्रत्यक्षेण। सुगममितरत्॥ ॥बालीत्यादि। बालीसुंभुरूनोलीस्खलितनिवसनाग्रहणकेकृत्वाविनिःक्रांतानिर्दयाजेम
ली। राहुरपितस्याप्रमुखंविलोकतेपुनर्विलोकतेगगनेभ्रांतोनखलुजानातिद्वयोश्चंद्रःकः। इहबालिकामुखंसुरभोलीअ
त्रा। तन्नसितंस्खलितंनिर्मलंपरिनिवसनंयस्याःसाऽपरीतियोग्यतयावक्तव्यं। निर्दयाजेंमालीविह्वलाग्रहणकेचंद्रोपरा
गेकृत्वाविनिःक्रांता। अर्थातरस्पहार। राहुरपितस्याप्रमुखंविलोकतेपुनर्विलोकतेगगनेभ्रांतःसंशयान्नःसन्नैवजानाति राम १३
कांतामुखचंद्रयोर्द्वयोर्मध्येकश्चंद्रइति। खलुएवार्थे। अत्रसंशयश्शुद्धताऽन्यामिश्रणेन॥ ॥हावित्यादिहावपत्तौऋविशं

कोनवीनजवा कुसुमदीशीनामाश्रयोक्तः उपसंध्यं संध्यासमीपे हृदयमपि रविचंद्ररूपं वियन्मंडलस्याकाशमंडलस्यांते ऽवसानेति
ष्ठति तदिह कोऽस्तं याति को वा उदयति कः सूर्यः कश्चंद्रः का प्राचीपूर्वा दिक् का च प्रतीचीपश्चिमा दिगिति न वयं विद्मः। अत्र रक्तरूप
तया गगनांतगमनेन चाभिधीयमानं साहश्यं अनेकविषमतयेवमिश्रेना। नहि वितर्कोक्तिर्निन्दा कथं नोक्तेत्यत आह उपलक्षणमिति
संशयोक्तावेवांतर्नो वा त्रपृथगुक्तासेत्यर्थः॥ सरोजेत्यादि निलीनाः संबद्धाः षट्पदा भ्रमरा यया यस्याः ते पद्मपत्रेनु दूमे विशालदृष्टेर्न
यिकाया अमूने चे स्थितरा वितर्कशिरोरुहाः केशाः स्थितः नतापक्ष्मसंततिर्यस्य ततः निशब्दं शब्दशून्यं निश्चले स्थिरं च भ्रमरहन्दं तु। अ
रुढेत्यादि एतन्मुखं स्थितर। कीदृशं अगूढेन प्रकाशेन हासेन स्फुटोच्चकोदंत एव केशरो यत्र तत्तरु एतद्धि कचं प्रफुल्लं पंकजं इत्येनेना २६
कारेण नलिनीवने पद्मिनीमध्ये प्रलीनामवस्थितां सखीं प्रोषितः स्त्रियो वक्रुकालेन विदांबभूवुः ज्ञातवत्यः। विदांबभूवुरित्यत्र उ
षविदेति लिट्याम्॥ मुहेरित्यादि मुखे मदस्खलितोल्लापे स्तानाईचिकुरे वेणीनिवसनसारे समुक्ताहारे उरसि। कालांतरे तरला
क्षिमदनः समुल्लसति माघेषु नः स्तनगृहे न ज्ञायते कुत्र वसति। इह कालांतरे माघातिरिक्तकाले मदस्खलितोल्लापे मुखे स्ता
नाईकेशे वेनीनिवसनेन कंचुकबंधेन सारे मुक्ताहारसहिते वक्षसि तरलनेत्रे च मदनः कामः समुल्लसति दीप्यते माघेषु न
: स्तन एव गृहे तत्र न ज्ञायते कुत्र वसतीति। उन्नयत्र विरूढकोटि हृदयविषयतये कयमाशंक्य स माधत्ते उक्तीति यथा परार्थी
नुमाने शब्दप्रयोगकारितो विशेषस्तथा शब्दपक्षे स्वरूपमर्थस्तत्र ले स्वार्थानुमानवत् त्वंविद्वृत्तिः। साम्योक्त्यादावुक्तिः शब्दस्या
यमेवार्थः यदुक्तिनिबंधनं नाम तथा च स्वरूपमाचस्यो क्तो निर्वचनेऽर्थालंकारता संशयेत्तु कोदेरुक्तिप्राधान्ये पुनरुन्नयालं

×पृच्छति· करति· निर्णयासन्नो निर्णयाव्यवहितपूर्वः· वितर्कानन्तरं निर्णयात्· वितर्कासन्नो वितर्काव्यवहितपूर्वः· संशयानन्तरं वितर्कात्· एतदेवाह· संशयेति· संशयानो ×
×वितर्ककोषघवलंबी· वितर्कानन्तरमुक्तमेव जानाति· अत एव विदांबभूवुरिति संशयरूक्षः· तथामाह रुइत्यादावपि· शब्दकारितोऽनयोर्भेद इत्याह· शब्दाश्चेति· तदुभयालं ×
कारता वितर्कादीनामित्याशंक्य ३×

कारतेति ॥४॥ अपह्नुतिलक्षणमाह अपह्नुतिरिति किंचित्प्रसिद्धं धर्मिणं धर्मं वाऽपह्नुत्यापलप्यान्यस्यार्थस्य प्रसिद्धस्य धर्मोऽपि
दृर्शनं प्रकटनमपह्नुतिः। न चास्या आक्षेपाद्भेद इति वाच्यं तत्र हि प्रतिषेधमात्रमर्थोऽत्र तु प्रतिषेधपूर्वकमन्यार्थकथनमिति
भेदः। औपम्यं तु पमातहृती। वाच्येऽत्र निधीयमाने। अपह्नोतव्यवस्तुनि अपह्नुतिविषयपदार्थे॥ नपमकृतीन नत्ताम्या आक्षेपा
दनेद इ...नत्र...यमनमर्थे ग्रीष्मे इत्यादि ग्रीष्मे दावाग्निमषीमलिनितानि दृश्यंते विंध्यशिखराणि। आश्वसिहि प्रो
षितपतिके न नवं तिन वघनाडम्बराणि। इह विरहिणी दावाग्निनादग्धविंध्ये मेघभ्रांत्या आर्ता सख्या समाश्वास्यते ग्रीष्म इति हे विर
हिणि विन्ध्यशिखराणि ग्रीष्मे वनाग्निना श्यामितानि दृश्यंते न तु नूतनवर्षाकालीनमेघा अमी नवंतीति समाश्वासं कुरु। अत्र च
श्यामिकया विन्ध्यशिखरनवमेघयोः साम्यमस्ति हि तमत औपम्यवतीयं॥ ॥नेत्यादि केतकीनां स्तनयोऽग्राणि न विलसंति शो
नं ते हन्त विषादे अयं विधिः प्रष्टाप्रवासिनः पांथान्हसत्युपहसति केतकीसूचिरूपेण। इयं चं चला चपला तडिल्लता न शो
न ते पुरोऽग्रेऽयं स्मरदीप्तिर्विलसन्तीप्रकाशते। स्तनयित्नीवनडाग्नेरति विश्वः। अत्र किंचित्प्रकाशेन केतकीसूचीविधिदलित
योः साम्यप्रतीतिरेवमितरत्र। औपम्यमप्यत्र व्यक्तमेव॥ ॥राजेत्यादि रोमोद्भेदेन रोमांचेन राजकन्यानुरक्तं नृपकन्य कानु —
रागितो मां रक्षकास्तदवेला काश्ववगाक्लेषुः जायेरन्। अंगस्मरणे जातं अहो वनं शीतलानिलं ततो रोमांचः। अंज्ञाननिश्चयस्य राग
त्योरितिनिदिनिकरः। अत्र पूर्वात्रिधाने न पूर्वलिंग नयोरसाहृश्यादनौपम्यता॥ ॥आनंदेत्यादि कन्यकामेव दृष्ट्वा कथं मा १४
नंदाश्रुप्रहत्तमस्ति। वातोद्धतेन रजसा वायुचालितधूल्या ममाक्षिपूरितं शेषमपह्नवादिकं पूर्ववत्। पूर्वापह्नुतिवत्। अपि

धानमनौपम्यमपि पूर्ववदेवपूर्वेकारणानुपन्यासेनापूर्वत्वं ॥ ॥ उर इत्यादि· उरः प्रेरितइति कारवेल्लीफलानि उच्छिन्नोषि दयित
वत्सले। कंटकविलिखितपीनोन्नतस्तनितान्यइदानीं। इह हे दयितवत्सले· प्रियप्रेमवति कंटकलिखितपीनोन्नतस्तनि हे· इदानीं ता
न्यउच्छिन्नान्येव। किंकृत्वा उरसा वक्षसा प्रेरितायाः इति विदृष्टेन तत्र कारवेल्लीफलानि उच्छिन्नोषि· चोटयसि कारवेल्ली· करइल्ली। अत्र
पूर्वोक्तकारणकथनात्पूर्वता उक्तयोः नौपम्यं व्यक्तमेव। ननु नात्र साहजिकोपक्रव स्तत्कथमपक्कृतिरलंकारः· अपक्कुत्येति आ
रोपेणापक्कवलक्षणयोगादपक्कृतिरित्यर्थः ॥ ॥ कस्मिन्नित्यादि· कस्यापि न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरं। सभ्रमरकम
लाघ्राणशीले वारितवाम्ये सहस्व इदानीं। इह प्रियाया अधरं सक्षतं दृष्ट्वा कस्यापि रोषो न भवति ततो हे सभ्रमरसहितपद्मस्याघ्राण
कारिके हे वारितवाम्ये दाक्षिण्यवति सं प्रति त्वं सहस्व सहिष्णुरेव। अत्रोक्तराईकारणोपन्यासादपूर्वता। पूर्ववदाशंकासमाधाने
इत्याहुर्यथोक्तेति ॥ ५ ॥ समाधिलक्षणमाह समाधिरिति अन्यधर्मस्यान्यत्र विशेष्ये यआरोपः स समाधिः। निरूढोऽदोऽव्यक्तः सो
ढ्रेदः स्फुटः ॥ दूर इत्यादि· दूरघृतिवद्धरागे अवगृहमान एव दिनकरे ऽपरदिशं। असहमानेव क्लाम्यति प्रियतम प्रत्यक्षदूषणं
दिनलक्ष्मीः। इह अत्यर्थधृतलोहित्ये ऽत्यर्थकृतानुरागे च दिनकरे सूर्ये· वल्लभे चापरदिशं प्रतीचीमपरनायिकां चाऽवगूहमाने सं
वध्नाति आश्लिष्यति च सति दिनशोभा वल्लभ स्फुटदूषणमसहमानेव क्लाम्यतीति ग्लाना भवति। अत्र नायकत्वाद्यारोपणं रागादिपदैः
श्लिष्टैः क्रियत इति निरूढ्रेदता ॥ ५ ॥ वल्लभे इत्यादि· वल्लभेन लघुव्यपकामति पुनरागच्छति चिरेणेति क्रियेतामरसिनि तव रोषस्य
स्थिरस्य। येन निराकुलं जल्पति किमपि न यावज्जनस्तावच्छिमेन विशीर्णा हृदिति दृश्यतनुः। इह हे तामरसिनि· पद्मिनि वल्लभेस्त्र

यैलघुश्रीघ्रं व्यपक्रामत्यपगाच्छति सति हिमसमये रात्रे र्दीर्घत्वाच्चिरेण पुनरागच्छति सति तवरोषस्य स्थिरस्य वलिरूपहारोऽहं कि
यैं इति काचित् खंडिता पद्मिनी मुद्दिश्य वदति येन हेतुना निरकुलो जनो यावदेव किमपि न जल्पति तावदेव हिमेन विशीर्णा झटिति
त्वं दग्धतनुरसि। व्यलीकमप्रियं। हिमानी हिमसंहतिरित्यमरः। नुष्टां दग्धां। तेधर्म्माः॥ ॥धर्म्यारोपरूपे समाधावव्याप्तिरतआ
ह अथवेति अन्योधर्म्मीहविवक्षितः धर्मपदसन्निधेः॥ चंद्रेत्यादि· कयोश्चित्सिद्धयूनोः सरय्वानदीभेदस्याम्नि सैकते वक्तु
कालं वादह्वैतं वचनविवादोऽभवत्। वादद्यूतमिति पाठे वादो विवाद एव द्यूतमित्यर्थः। सैकते कीदृशे चंद्रज्योत्स्नया विसंदे
स्वच्छे पुलिने तौ योप्रियतमागीयत्र तत्र। अनेन रम्यतोक्ता। वादस्वरूपमाह एकः केशिनं प्रथमं निहतं ब्रूते अन्यः कंसं प्रथमं निह
तं ब्रूते हे भगवन् सप्रश्निहस्त्वं तत्त्वं यथार्थं कथय भवता तत्र तयोः केशिकंसयोर्मध्ये कः पूर्वं हत इति। सिद्धौ च तौ युवानौ चेति
सिद्धयुवानौ। केशी असुरभेदः कंसोऽसुरभेदः। अत्र विलोलत्ताद्धर्माणां च चक्रधरत्वादीनामारोपः स्फुटएव॥ ॥देवामदे
व·त्र मुकुंदस्य कंप आ जानाति। कीदृशस्य स्वव्याघाते सति इति वितर्कोन्दधतः इव एष प्राप्तलक्ष्मीकोपि कस्मात्पुनरपि मद्विषये
मेथेन मथनदंडेन खेदं तं विदध्यात् कुर्यात्। अत्र लसमनस आलस्यहीनस्यास्य निद्रामप्यपूर्वां नैव संभावयामि। अखिल
द्वीपनाथो रावणस्तमतुलक्षीकृत्य यातः प्रयातः पुनरयं कस्माद्धेतोः सेतुं बंधं बध्नाति। मथ्यतेऽनेनेति मंथः करणे हलश्चेति
घञ्। अत्र प्राक्‌श्रीरित्यादि श्लिष्टपदैर्धर्मिण एव विष्णुरूपस्यारोपो न तु तद्धर्माणामसुरघातकत्वादीनां॥ ॥समाधिमेलित
योरभेदमाह समाधिमिति समाधिरेव मेलितं उभयत्रापि धर्माध्यासात्॥ पल्लवितमित्यादि पल्लवितमिव करपल्लवाभ्यां राम
प्रफुल्लितमिव नयनाभ्यां। फलितमिव पीनपयोधराभ्याम ज्जायालावण्यं इहास्त्रायाग्रहपतिपुत्र्याः नायिकाया लावण्यं सो १५

कुर्येहस्तपल्लवाभ्यांपल्लवितमिव.नेत्राभ्यांपुष्पितमिव.पीनस्तनाभ्यांफलितमिव.अस्ति।अध्यारोपेबीजमाहंतुस्तबकयतीतितद्धि
करपल्लवादीनामनाध्यारोपाद्धिजीवएवनवेदतआहंकरोति·अनुपात्तोऽनुक्तोयोव्यापारोऽध्यारोपविषयस्तद्धेतुत्वेन.तदुप
स्थितिकारणत्वेन.तत्करणत्वेनवा.अतएवकर्त्रपेक्षयाऽप्रधानतयाऽस्यातत्त्वेणान्वयस्तेषामित्यर्थः।तर्हिसमासोद्देशोऽनुद्देशः
कथमस्येत्यतआहंसविति·समासोक्तिरित्यत्रसमासविरितिकर्तव्यतोक्तिग्रहणमधिकार्थसूचकमित्युक्तिपदेनैवमेलितोद्देशः
कृतइत्यर्थः॥ ॥देहोस्त्वेत्यादि·देहइवपततिदिवसः।कंठच्छेदइवलोहितोजायतेरविः।गलतिरुधिरमिवसंध्याचूर्णितकेश
कृत्स्नंशिरइवतिमिरं।इहदिनमंगमिवपतति.रक्तःसूर्यः।कंठच्छेदइवजायते.रक्तमिवसंध्यागलतितिमिरंकेशव्यामंशिरइ
वचूर्णतेइतस्ततोयाति।अत्रपतनादयःक्रियालोहित्यादयोगुणाः।प्रधानक्रियापततीत्यादिकातदध्यारोपोदिवसादिषु॥छा
समासोक्तिंलक्षयतियत्रेतियत्रातिप्रसिद्धतयोपमानादेवैतस्योपमेयज्ञानं.सासमासोक्तिः।समसनंसमासःसंक्षेपइत्यन्वर्थ सद्गुक्तिः
तापि।प्रतीयमाने.ज्ञायमाने.वाच्येऽनभिधीयमानेच.साहश्ये।श्लाघांप्रशंसांगर्हांनिंदांच.श्लाघागर्हे.च.एतावुपाधीनृपयोर
कार्यसमासोक्तौवदंति।विशेषमात्राभ्यांयुक्ताभ्यांपिज्ञापिविशेषणद्वयेनेदवतीएकातुल्याकारविशेषणा.अपरातु
ल्यातुल्यविशेषणासंक्षेपोक्तौच.प्रकारद्वयंजवतितदाहअन्येत्यादि॥गत्तुंगेइत्यादिंतस्यन्यग्रोधस्यवटवृक्षस्यश्लाघास्तप्र
प्रशंसास्ववचसाउच्यतेकिंसमाप्यते·किंतुनतस्यश्लाघावक्तुमशक्येत्यर्थः।अंगेतिसान्त्वनयसंबोधने।कीदृशस्यउत्तुंगेउ
च्छ्रिते·उच्चावचानिभिन्नोन्नतायाबाणाःपाषाणायत्र.तत्कृतेच.शिखरिणिगिरौकृतावासस्य।श्लाघाहेतुमाहंसवटोबंधुर्मित्रं
नोभे·अश्लाघागर्हेः५

वापुरापूर्वं कृतः अर्थोऽर्जनेन अथवा सत्कर्मणां श्रेष्ठव्यापाराणां संचयः उपचयः किं अर्थोऽर्जनस्य। कुल्लानिश्चाविपन्नाः पत्र
शून्याः शाखिनो वृक्षाः यत्र ताद्दशे मार्गे यं वटवृक्षं पान्थजनो विश्राम्यति। तत्रापि च त्यत्र वङ्क्षीत्व नेतरं मनुबितिश्च मौन कार्ये:
तत्रापि च यथा कालोऽत्र सन्तीति विशिष्टस्यैवमत्वर्थसंबन्धात् विसकिसलयच्छेदपाथेयवन्त इति वत् केवलाद्विशिष्टस्य निम्नवु
द्धिविषयत्वात् अत एवादंडीत्यादयो नित्तरं गं प्रयोगा इत्यवधेयं। ग्रावोपलाश्मान इत्यमरः। अत्र परोपकारितया न्यग्रोध व
दान्ययोः साद्दश्यं प्रतीयमानं तत एवोन्नयोः श्लाघापि॥ ॥ किमित्यादि हे सु द्रुम चतुष्पथे किमर्थं जातोऽसि त्वं तत्त्वज्ञोऽसि। यदि वै
ध्वनानि विलाच्छाया यस्य ताद्दशोऽसि तदा छायया किं वृथा। यदि संपन्नः समृद्धः सन् फलितोऽसि तदा फलं नो रत्नवत् किं किं तु
न किमपि। यदि आढ्योऽसि महानसि तदा सम्यक् उपकारेण नतः। किं संप्रत्यधुना स्वैर्निजैः रेवडुष्टिते ज्ञैन तो लोकात्वं शिखाया
मयत्नागे शाखाशतस्याकर्षणमाकृष्टिः क्षोनश्चालनं मामोटनं संकोचनं भंजनं छेदनमेतानि सहस्व अनुभव। आढ्य इत्येम
हत्यपीति विश्वः। सहस्वेति षह मर्षणे तङि लोटि मध्यमपुरुषैकवचने रूपं। अयमाचे शिखामते तिथरोगी: जनत इति पंचमं
तात्तसिः। व्याजगर्हणा कपटनिन्दा वटवृक्षनिन्दा व्याजी कृत्य सत्पुरुषनिन्दोपक्रमात्॥ ॥ निष्कंदामित्यादि इतरोऽन्या वरा
हीह्द करी सुतान् स्वकराच्छ्रते जनयति। किं कर्त्तुं अरविंदिनी निष्कंदा मुन्मूलितमूलां कर्तुं। स्वपुटितोऽनिन्नोन्नती कृत उद्देशो
यस्याः ताद्दशीं स्थलीं कर्त्तुं पल्वलेऽल्पसरसि अंबु जलं जम्बालेन कर्दमेन आविलमनच्छं कर्त्तुं। सा पोत्रिणी वराही पुत्रिणी प्रशस्त
पुत्रवती। यस्याः शिशोरेव बालकस्यैव दंष्ट्रायामियं सर्वपदि प्रलये स्थिता दंष्ट्रायां कीदृश्या चतुर्णामर्णवानां समुद्राणां श्रुमि

16

राम १९

पटलैः कल्लोलसमूहैः राज्ञा विततायां पूरितायां व्याप्तायामिति यावत्। जम्बालः पंकोऽस्त्री त्यमरः। वराहीति पुंयोगादाख्याया
मिति ङीष्। पुत्त्रिणीति प्रशंसायामिनिः। वराहः कोलः पोत्रीत्यमरः। अत्रोभयोः साहश्यं वराहत्वादिना प्रतीयमानं॥ ॥ इतइत्या
दि। सिन्धोः समुद्रस्य वपुराशयो विततं विस्तीर्णं मूर्छितं वलवत्तं नारवदनं नमं च अत्रैवाश्चर्यं। इतोऽत्रैव हरिर्वसति अत्रैव के
शवरिपूणामसुराणां पुरं नगरमस्ति अत्रैव शरणप्राप्ताः पर्वतेषु मध्ये पक्षिणः सपक्षा मैनाकादयः शेरते स्वपंति। न च शि
खरिपक्षिण इत्यत्र न निर्द्धारण इति षष्ठीसमासनिषेध इति वाच्यं। तन्निषेधस्यानित्यत्वान्निर्द्धारणस्याविवक्षणाद्वा निर्द्धार
णे। षष्ठी न कजात्यादेरभावे न तद्गुणत्वयनात्। यद्वा शिखरिणश्च ते पक्षिणश्चेति विशेषणसमासः। पूर्वनिपातेतु वक्ष्येकत्र निय
म इति धृव स्थितिः। अत्रैव वलवान लोक्तिः सकलमेघैः सह। पुष्करावर्त्तसंवर्त्तकाल कांतिज लप्लवाः। इति वारिमुचां वंशा
श्चतुर्द्धापरिकीर्त्तिता इति पुराणं। अत्र श्लाघा गर्हयोरत्तमनृपादन्तुत्तयवतीयं॥ ॥ नालस्येत्यादि। यस्यैवम्बुजस्य पद्मस्यैवमने
ना कारेण स्थितिरवस्थितिस्तत्रात्म्भुजोऽश्रियो लक्ष्म्या वसतिर्न्निवासो युक्त एव। नदाह लालस्य नालायाः प्रसरो विस्तारः अथच
न आलस्यस्यालसतायाः प्रसरआधिक्यं। जलेष्वपि तोयेषु कृतावासस्य अथच मूर्खेष्वपि कृतावासस्य। कोषे कुड्मले रुचिः
कांतिः अथच कोषे पात्रेऽर्थसार्थवा रुचिः प्रीतिः। दंडे पद्मकांडे कर्कशता काठिन्यं। अथच दंडे शासने कर्कशता कार्कश्यं।
मुखे उपक्रमे मृदुता कोमलता अथच मुखे वदने मृदुता मधुरवाणीकता। मित्रे सूर्ये महान् प्रश्रयः प्रीतिः अथच मित्रे
सुहृदि महाप्रीतिः। आमूलं मूलादारभ्य गुणस्य तंतोः संग्रहे ग्रहणे व्यसनिता आसंगः अथच आमूलमादिमूरूषादार

ध्यगुणानां शीलादीनां संग्रहे वर्तुलीकरणे व्यसनिता प्रयत्नः। दोषाकरे रत्ननिकरेऽदोषः अस्या अयं च दोषाणामाकरे उत्पत्ति
स्थाने जनेऽदोषोऽप्रीतिः। नालानालमथास्त्रियामित्यमरः। जलं नीरे च मूर्खे चेति विश्वः। कोषोऽस्त्री कुड्मले पात्रेऽर्थसंघाते दिव्य
योरिति मेदिनिकरः। दण्डं प्रकाण्डे शास्तौ चेति च। सुखमास्ये च घोरेऽपीति च। मित्रं सुहृदि मित्रोऽर्क इति च। शिफायां कारणे मू
लमिति च। गुणस्तन्तौ च शीलादाविति च। दोषः स्याद्दूषणे दोषा रात्रौ वाहौ च कीर्तितेति च। वसतिः स्यादवस्थान इति विश्व
ः। अत्र पद्मसज्जनयोः श्लिष्टविशेषणपद्मैरुपमानोपमेयत्वमतः जयार्थकविशेषणपदे श्लेषद्वयस्यार्थद्वयमभिधीयते प्रशंसा
परतया च श्लाघावत्त्वं॥ ॥ उपाश्वमित्यादि हे पांथास्त्वत्त्वरस्त्वं डागं पुरं प्रपाश्व सेवध्वं कीदृशं मार्गास्यतिलकमलंकारीरूतं
। यत्सर आसाद्यागतश्रमनराः स्वयं स्वेच्छं विलसथ यथेच्छं क्रीडथ। इतोऽस्मात् द्वाराद्वेः सकाशान्निर्वृत्तिरेव कल्याणी कुशलदा
न पुनः कथमप्यवतारोऽत्र कुशलदः अत्रावतरणं न कर्त्तव्यमिति भावः। द्वाराद्वेः कीदृशात् जरठेन जीर्णेन कमठेन कच्छ
पेन स्तुलं प्रयोजनं यस्य तस्मात्। उपाश्वमिति उपपूर्वे आस उपवेशने लोट् मध्यमपुरुषबहुवचनेऽधूंखि चेति सकारलोप
ः। कमठ कच्छपौ वित्यमरः। कल्याणीति गौरादित्वान्ङीष्। अत्र पूर्वार्द्धे सरःसज्जनयोः परोपकारकत्वादिगुणैस्तुल्यैरेव सा
दृश्यमभिहितं श्लाघा तु व्यक्तैव। उत्तरार्द्धे तु द्वाराद्वेस्तादृशस्यापकारकतया गर्ह्या व्यक्तैव ज्ञायते। इह सज्जनगता निंदा
पि प्रतीयते किंतु सा विशेषणद्वारानेत्यतुल्यविशेषता॥ ॥ लक्ष्मीत्यादि सबलिरेव दान्यः येन बलिनाऽस्य हरेर्विष्णोः करो राम
हस्तो भिक्षापात्रीकृतः भिक्षापात्रत्वमापादितः। कीदृशः करः लक्ष्मीस्तनक्रोडकुंकुमेनारुणितः लोहितीकृतः। अत्र स्व १२
जातित्वं तुल्यचरितत्वं। हरिबल्योरपेक्षयाऽन्यत्वमपि। तर्हि समासोक्तिः कथमत आह संक्षेपेति संक्षेपेणोपस्थापनादे

व...

वृसमासोक्तित्वमित्यर्थः॥ ॥पिबन्नित्यादि· भ्रमरो यथाकामं यथेष्टं प्रफुल्लपंकजे मधु पिबन् सन्· असन्नद्धसौरभ्यमप्राप्त
सौगंध्यमपि कुड्मलं चुंबति· तत्पदस्य वाक्यार्थस्यैव कमितता। अत्र नित्र नित्रजातितयाऽन्यजातिता॥ ॥नान्यस्योक्तिरनन्योक्ति
स्तथा चानन्योक्तिपदेन तद्भावापत्तिस्तत्ताविषयत्वेनोच्यते एषोऽयमित्याकारस्तस्याः॥ सुधेत्यादि· हे सखे उपशाकाराग्रं शाका
राग्रसमीपिनयनेन नेत्रद्वयं प्रहिणु देहि मनाक् त्वं तर्कय· अनाकाशे· आकाशातिरिक्तदेशे· गलितहरिणस्त्यक्तलांछनः कोऽयं शी
तकिरणश्चंद्र इति। कीदृशः· ज्योत्स्नां किरन् विक्षिपन्· कीदृशीं सुधां· मिथ्यावबोधोऽनुबद्धो ग्रासः कवलो यैरेवंरेतैः रूपवनस्थि
तचकोरैः रभसतामनुगतां। स्वच्छां· नवा नूतना याऽलवलीलता भेदस्तस्याः पाकस्य प्रणयिनीं प्रश्रयवतीं च। लवलीच लता
भिदीति विश्वः। लवली वा च कोलवलि शब्दोपि लवलिः स्त्री तपर्ण्यपीति शब्दभेदः। उपशाकाराग्रमित्यत्र सामीप्येऽव्ययीभाव
:। अत्र· अब्धास्य आरोपः। पूर्वार्द्धे तुल्यविशेषणत्वमुक्तं। उत्तरार्द्धेऽतुल्यविशेषणत्वं। तस्यैवाभिधानादनन्योक्तिरेकस्यै
वाभिधानात्क्रूरता च॥ ॥कमलमित्यादि· अनंभसि· जलशून्ये देशे कमलमस्ति। कमले पुनः कुवलये· नीलनलिनद्वयं· ता
ल नि च कमले कुवलयानि· कनकलतिकायां सुवर्णलतायां· सोच कनकलतिका सुकुमारा कोमला सती सुनगारस्येत्यनेन
प्रकारेण केयमुत्पातपरम्परा· अरिष्टपंक्तिः। उत्पातोऽरिष्टमित्यपीत्यमरः। पूर्ववदिति· कस्यांचिन्मुखादौ कमलाद्यारोपः· विचित्र
ता च· कमलादौ कुवलयाद्यभिधाने नैवोक्ता· तस्या एवाभिधानादनन्यतयोक्तिः॥ ॥लावण्येत्यादि· अत्र देशोऽपरैवापूर्वैव· केयं ला
वण्यसिंधुः सो कुत्र नदी· यत्र चंद्रेण सह पद्मानि संप्लवंते मिलितानि भवंति यत्र कुंभिकुंभं नटी उन्मज्जति उत्थिता भवति यत्रापरे
मा

ऽन्ये कदलीप्रकांडविस्तदंडाः संति। सिंधुरश्चोक्तमानूनद्यां स्त्रियामिति मेदिनिकरः। तीरदेशे तटी मतेति च। अत्र सिंधूक्त्याऽन्योक्ति
तां यत्रेत्यादिना सिंधुरेवोक्तेत्यनन्योक्तिता। अन्यानन्यातिरिक्तसमासोक्तिं संगृह्णाति उपलक्षणमिति॥ इन्दुरित्यादि सीतायाः पुरतो
ऽग्रेऽञ्जनेन कज्जलेन लिप्त इव चंद्रः हरिणीनां दृष्टिर्जडिते व जलीकृतेव। प्रवालदलं विम्लानलौहित्यमिव। कनककांतिः श्याम
व। कलकोकिलवधूकंठेषु पारुष्यमतिक्रमवचनमिव प्रस्तुतमुपक्रांतं हंत हर्षविषादे वा शिखिनां मयूराणां बर्हाश्च सगर्हा इव
जाताः। पारुष्यमतिवादः स्यादित्यमरः। अत्र सीतापदेन मुखाद्यवयवसमूह उक्तस्तदग्रे उपमानानां तत्तद्दशा उत्प्रेक्षाभिधानाद
उक्तान्यपि तदुपमेयानि मुखादीनि ज्ञायंते इत्युपमानोपमेयविषये संक्षेपोक्तिरियं॥ ॥ समासोक्तिसमासोक्त्योर्भेदं मन्वानो ने
दं कं पृच्छति काइति। उत्तरं यत्रेति यत्र प्रकरणपरिप्राप्ते विशेष्येऽप्रकरणपरिप्राप्तधर्माध्यासः सा समासोक्तिः अत्र दमानेव ज्ञा
म्यतीत्यादि। अत्र प्रियतमप्रत्यक्षदूषणाध्यारोपोऽप्राकरणिकः। यत्राप्रस्तुते प्रस्तुतधर्माध्यासः सा समासोक्तिः यथापि वन्मधु
यथाकाममिति अत्र भ्रमरेऽप्रकृते प्रकृतस्य कामिनोध्यासः। तर्हि धर्म्यध्यासतुल्यते वास्येत्याह नचेति। प्राकरणिका प्राकर
णिकत्वाभ्यामिव विशेषस्तयोरिति धर्म्यध्यासेपि न दोष इत्याह नेति सत्वं तत्त्वमित्यादौ धर्मिधर्मयोरध्यासः अनाकाश इत्यादौ
तु धर्मिण एवाध्यास इति नेद इत्यर्थः। सत्वं तत्त्वमित्यादौ मनसा अनाकाश इत्यादौ तु वचनेनाध्यासः॥७॥ उत्प्रेक्षालक्षणमा
ह अन्यथेति प्रकारांतरेणावस्थितं वस्तु यस्यां प्रकारांतरेणोत्प्रेक्ष्यते परिकल्प्यते सोत्प्रेक्षा। असदारोपणमुत्प्रेक्षेति लक्षणं। किं
रूपं वस्त्वित्याकांक्षायामाह द्रव्यमिति द्रव्यं पृथिव्यादि गुणो रूपादिः क्रिया पाकादिः॥ देहस्येत्यादि यस्य दर्पणप्रतिमां प्रतिविं
वे देहस्या गौरी पश्यति अन्याऽर्धमात्मनस्तन्न मर्धनारीश्वरांतरमिव। अत्रैव शब्दस्तूत्प्रेक्षाव्यंजकः। अर्धनारीश्वरांतररूपं द्रव्यमि

दकल्पत इत्युत्प्रेक्षा द्व्यगता ॥ पल्लवितमित्यादि । विहृते यं समीर्ष्य लंकारे । अत्र सौहृद्ये स्य गुणस्य पल्लवितत्वादिना कल्पनं गुणो
त्प्रेक्षा ॥ ॥ सनेत्यादि · हे नरेंद्र सेनागजास्तव विजयस्तंभानि मालिखंतीति मन्ये । कीदृशांस्त्वकराणां हस्तिहस्तानां या निपुष्कराणि अग्राणि ·
तान्येव लेखन्यः कापद्धतिर्ख्यातां स्तानि पिंडस्थलात मदमेव मसीं वारं वारमादाना गृह्णंतः । कुत्र लिखंतीत्यत आह समुद्रतीरतालीप
त्रमध्येषु । मन्ये शब्द उत्प्रेक्षा व्यंजकः । पुष्करं करिहस्ताग्रे इति विश्वः । न च लिखिः कुटादिपाठगडि· वेगुणेनावे लिखनीति स्यादिति वा
च्यं दृद विलेखन इति निर्देशेन ङित्वविधेरनित्यत्वबोधनात् अत एव लेखनी स्तनकर्णस्य कायस्थस्य न विश्वसेदित्यादि प्रयोगाः । लेखनी
लिपिसाधके इति रत्नकोषः । करिणां बंधनस्तंभ आलानमित्यमरः । शरीरं वर्ष्म विग्रह इति च । अत्र पुष्करादेर्लेखन्यादित्वेनोत्प्रेक्षणं
क्रियोत्प्रेक्षा । न चेह द्व्याश्रितैवेति वाच्यं लिखनरूप क्रियायामेव सर्वेषां तात्पर्यात् तस्या एव सर्वैर्निर्वाहात् यत्परः शब्दः स शब्दार्थ इ
ति न्यायात् ॥ ॥ उत्प्रेक्षावयवादीनामुत्प्रेक्षातो न भेद इत्याह उत्प्रेक्षेति ॥ अंगुलीभिरित्यादि · शरीरं तनीमुखं चुंबती वा कुड्मलीकृता
नि सरोजान्येव लोचनानि यत्र चुंबने । तद्यथा स्यादेवं । किं कृत्वा मरीचिभिरंगुलीभिस्तिमिरं केशसंचयं संनिगृह्य गृहीत्वेव । शायो वा
दोत्कर्षतादो दर्शनात् । अत्र द्वितीयेन इव पदेन भिन्नपदतया वाक्यकल्पनमितरपदस्यापि तच्छून्यपदस्यापि तदर्थपरत्वमित्यु
त्प्रेक्षावयववत्वं अत एवोत्प्रेक्षा भेदत्वं अवयवक्रियामात्रस्यावयविक्रियोत्प्रेक्षणात् । अवयवावयविभावस्त्वांगांगिभाव एव ।
यद्वा अवयवमात्रक्रियोत्प्रेक्षणमेवावयवत्वात् प्रेक्षेत्याह अन्य इति ॥ लीनेवेत्यादि · विवृत्तायमनुप्रासे । एतन्मते पूर्वोदाहरणमंगुली
भिरित्यादावुत्प्रेक्षोपमायामंतर्भवतीत्याह तेषामिति ॥ ॥ किंशुकेत्यादि विनावस्तुरागिररर्णया महारण्यस्य दग्धादग्धं दग्ध

वा ३

मदग्धं च मार्गं पश्यतीव । किं कृत्वा किंशुककुसुम[illegible]पदेशेन किंशुककुसुमव्याजेन सर्वत्र ह्रस्तमाकल्य । महारण्यमरण्यानीत्यम
रः । चित्रं नाम तु विस्मापकवस्तु इति च । अत्र व्याजपदेन किंशुककुसुमानां स्मरस्य मांसपिण्डत्वमतः प्रमाणगर्भोत्प्रेक्षेयं ॥ ७ ॥ यदेतदित्यादि ·
यदेतच्चन्द्रस्यान्तर्मध्ये मेघमेचकं विलासं कुरुते लोकस्तच्छशकं इत्याचष्टे वदति । मां प्रति तथा नोत्तरं । अहं पुनरित्थं मन्ये । कीदृशं त्व
दीयशत्रु विरहग्रस्ताया वध्वाः कटाक्षा एवोल्कापातस्तस्य व्रणकिण एव कलङ्कस्तेनाङ्किता ततुः शरीरं यस्य तादृशं । लवने शशक
लाञ्छन इत्यमरः । अमानो नाम प्रतिषेधवचनो इति च । अत्र निजमतोपन्यासादुत्प्रेक्षा समर्थनमिति मतोत्प्रेक्षेयं ॥ ८ ॥ अप्रस्तु
१९ तस्तुति लक्षणमाह · अप्रस्तुतेति · अस्तोतव्यस्यानिंदितस्य कुतोपि कारणात् स्तुतिः प्रशंसा ऽप्रस्तुतस्तुतिः । अतएव समासोक्तेर्भे
दः · तत्र स्वरूपमानोपमेयता · अत्र तु निंदितमर्थान्तरस्य स्तुतिरिति । सा तु निषिध्यमाना प्रतीयमाना चेत्याह वाच्येति । तत्र हेतुद्वार
कमपि विभागमाह · सालिति · धर्मस्याधिक्यकामस्य · तेषामन्यतमस्य वाहुल्येन वाधया सर्वत्र स्वाभिप्रायस्य प्रकृष्टसिद्ध्या सोत्पद्यमा
नाप्रतीयत इत्यर्थः ॥ मित्र इत्यादि · संतोषं गया मा खेटकं व्यसनमकर्तव्यं वदंति यत्तन्मिथ्या ईदृग्विनोदवत्साहः कुतः कुत्र किंतु
नकुत्रापि । ह्रियतः वपुर्लघु भवति निन्दितमिव भवति । कीदृशं मेदसाव लस्य छेदेन संचलनेन कृशमुदरं यत्र मेदसां स्थित्या
स्थौल्यं भवति । कृशोदरतयैव उत्साहयोग्यं · अतएव तुन्दिले भवतु त्साहः । सत्वानां प्राणिनां भयक्रोधयोर्विकारयोरिंगितमपि लक्ष्य
ते भये चित्तमीदृक् क्रोधे चेदृगिति । स चप चिनोप तुच्छिराणामुत्कर्षः प्रदिष वक्षले लक्ष्ये सिध्यंति भेदका भवंति च । मेदस्त्वपा राम
वसेत्यमरः । अतोक्तहेतुद्वाराभिजानिप्रायस्य सिद्ध्या मृगयाभिनंदनेधर्मवाधनयाऽभिधीयमानमत इयमप्रस्तुतस्तुतिः । १९

द्वि १

धर्मवाधनामाह 'अहिंसेति' मृगयाहिंसाजनिकाऽतो धर्मवाधा इत्यर्थः॥ ॥ कालकूटेत्यादि- कालाञ्जरतुः शैति वालकटेलगाममकं
ठे द्वयोरपि नरकनिवासः श्रमको यदि न वति तदा न वतु। इह रे कालाञ्जरेषु हुः स्थितिः दुरुपदेशा वालक षोडशवर्षवयस्कं मम
कंठे लग मामालिंगयेत्यर्थः द्वयोरावयोस्तथा सति नरकनिवासः समकस्तुल्यो यदि न वति तदा न वतु तत्रावयोः समानएवे
ति नरकोपि स्वर्गः। कालाञ्जरेति लौकिकी संज्ञा। रे इति नीचसंबोधनं। वाल आषोडशाद्वर्षादिति मनुः। समक इति स्वार्थे कन्।
पौगंडो व्यवहारानभिज्ञः 'पौगंडस्तु ततः परं। परतो व्यवहारज्ञ इति मनुः। अधीतेति अधीतं धर्मशास्त्रं मन्वादिस्मृतिर्येन सः
अभिमतमाकांक्षितं रूपं सौन्दर्यं यस्य सः तादृशश्चासौ पौगंडश्चेति कर्मधारयः। रूपक इत्यत्र शेषाद्विभाषेति कप्। अविनय
वती वेश्या। अत्र निजाभिप्रायसिद्ध्या महोत्साहसुरतरूपनियोगस्य साक्षादनभिधानात् प्रतीयमाने वाच्ये स्तनस्तुतिः। धर्म
वाधामाह 'परस्येति। दाराः परपत्नीः॥ ॥ पंगो इत्यादि- खंज त्वं वन्ध्योसि यत्त्वमर्थी सन् परेषां गृहं न यासि। हे अंध दृष्टिशून्य त्वं धन्यः
यदुन्न गर्ववतां मुखानि त्वं नेत्रैः न पश्यसि। हे मूक त्वं श्लाघ्योसि यस्त्वं कृपणं जनमर्थाशया न स्तौषि। हे वधिर शब्दश्रवणशून्य
त्वं स्तोतव्योसि यस्त्वं खलानां दुर्जनानां गिरं वाणीं न शृणोषि। पंगुः खंज इति स्मृत इति हारावली। अवाचि मूक इत्यमरः। अत्र पं
ग्वादीनां वन्ध्यादिपदैः साक्षादनंदनाद्विधीयमानता। अर्थवाधामाह 'अनीति' अनेन मानिनामर्थसिद्धिवाध एवोक्तः॥ ॥
काममित्यादि 'हरिणा वने सुप्रयत्नेनतः सुलभेन तृणेन कामं यथेच्छं जीवन्ति धनिषु धनिकेषु दैन्यं न विदधति कुर्वन्ति। तथापि ते हरि
णाः पशवः वयं पुनः सुधियः पंडिताः किल प्रसिद्धौ निश्चये वा। अत्यर्थं अमतो कामामिति विश्वः। अत्र मृगाणां न साक्षादभिनं

हे पंगोद्

नि २

दनें किंतु तत्प्रतीयतइतीयं प्रत्येतव्या। अत्रार्थपर्यवसायमनस्त्विर एव ॥ ॥ एत्यादि· न मुंचंति· दीर्घश्वासेन रुदंति न नवंति विरहकृशा
:। धन्यास्तायासां वक्रवल्लभ वल्लभो न त्वं। नायिकां नायकविश्लेषवतीं दृष्ट्वा तत्सखी नायकमुपगम्य तस्या अनुरागं दर्शयन्नाह· न मुंच
तीति· हे वक्रवल्लभ· ता नायिका धन्याः दीर्घश्वासं विरहजं न त्यजंति। न रुदंति· विरहकृशाश्च न नवेति· यासां त्वं वल्लभो नासि। अत्र प
न्याइत्यादिनाऽनुरागिण्याः साक्षात्स्तुतिरभिहिता· तस्या एव कामप्रति हि र्वधिका ॥ ॥ सुहेत्यादि· सुखपृच्छकं जनं दुर्लभमपि
क. दूरान्ममानयमान। उपकारं च रजीवमपि गृह्णन् कृतापराधोऽसि। काचिदत्यनुरागिणी नायकमन्यानुरक्तमपि वार्ताकरणाय
तेदोषगर्भमाह· सुखेति· हे चतुर· सुखपृच्छकं तवांगे सुखमधुनेति प्रश्नकारकं जनं दुर्लभमपि मम कृते दूरदेशादानयमान· प्रा
२० पक· अत एवोपकारक· जीवमपि गृह्णन् त्वं न कृतापराधोऽसि। सुखं सुष्ठु पृच्छति सुखपृच्छकः समभिहारे वुनिति योगविभागा
हुन्। अत्र सुखपृच्छकेत्यादिना स्वाभिप्रायसिद्ध्यानुरक्तायाश्चरे प्रति वाक्यं· तेनाप्रस्तुतस्तुतिर्जायते· न त्वभिधीयत इति। काम
काव्यामाह शरीरेति ॥९॥ तुल्ययोगितालक्षणमाह· विवक्षितेति· विवक्षितो वक्तुमिष्टो यो गुणस्तेनोत्कृष्टा अधिका ये तैः सहस्त
त्यर्थे निंदार्थे वा कस्यचित्स्तुत्यस्य निन्द्यस्य वा तेन गुणेन तस्य यत्समीकृत्य कीर्तनमभिधानं सा तुल्ययोगिता। गुणोत्र धर्मः सा
धुरसाधुर्वा· अत एव स्तुतिर्वा निंदा वा स्यात् ॥ शेषइत्यादि· शेषः सर्पेन्द्रो हिमालय स्त्वं च सर्वे यूयमिमां क्षितिं विभृथ धारयथ। की राम
दृशाः महांतः महत्त्ववंतः गुरवो गुरुत्वाश्रयाः स्थिराः स्थैर्यवंतश्च। कीदृशीं लंघिताऽतिक्रांता मर्यादा यया तां· अत एव चलंतीमि २०
तस्ततो गामिनीं च। अत्र महत्त्वादिकमभिहितं· नृपस्य च शेषहिमाद्रिभ्यां तुल्यतास्थापनेनोत्कृष्टसा...म्यकथनात्स्तुतियोगः·
॥ ॥ संगतानीत्यादि· मृगाक्षीणां संगतानि संगमाः स्वयं घनं निरंतरमारब्धान्यपि कृतान्यपि· तथा तो...तां विच्छत्तौ· विलसितानि·

चघनैर्मंथिरा र स्वान्यपि लक्षणह्यमारं नक्षणाद्दृष्टिमपरमपि लक्षणं न तिष्ठंति कुतो दीर्घकालं। अत्र प्रसिद्धचापलयाविद्युतां स्त्रीणां संगम
स्य चपलतासमीकृत्योच्यत इति निंदातुल्ययोगितेयं॥ ॥ यमस्त्यादि· यमादयो नवंतोऽनन्यविषया मनन्यगामिनीं लोकपाल इत्यनेना
कारेण श्रुतिं ख्यातिं विभ्रति· धारयंति। सहस्राक्ष इंद्रः। श्रुतिः ख्यातौ च वेदे चेति विश्वः। अत्र चत्वारो यमादयो लोकपाला इदानीं
नवावृपं च मो लोकपालशब्दवाच्य इति यमादिसमानतात्व्यापनेनोत्कृष्टसाम्यकथनाद्वाज्ञः स्तुतिः सा तु प्रतीयमानतुल्यगुणेने
व॥ ॥ राजानमित्यादि· भूपमपि सेवंते विषमथ च पभुंजते· स्वादंति· अन्यस्त्रीभिः सह रमंते· विलसंति· अतो मनुष्या विषमाः साह
सिकाः। खलु हेतौ। अत्र विषमतायां वा तुल्ययोगस्तत्तत्क्रियाविषयतया वा राजसेवा परस्त्रीरत्योर्विषोपभोगतुल्यतां बोधय
ति· स च प्रतीयमान एव॥ ॥ मतांतरेण तुल्ययोगितामाह· अन्ये इति सुखहेतुदुःखहेतुवस्तुनोः स्तुतिनिंदार्थसाम्ये तुल्ययोगि
तामन्ये प्राहुः॥ आहूतस्येत्यादि· अभिषेकाय राज्याभिषेकाय आहूतस्य दशरथाह्वानस्य वनाय वनं गंतुं विसृष्टस्य च तस्य रामस्य स्वल्पोप्या
कारविभ्रमः आकारान्यथात्वं मया न लक्षितः। अन्यथात्वेपि विभ्रम इति धरणिः। अत्र राज्याभिषेकः सुखहेतुर्वनगमनं दुःखहेतु
स्तयोः पितृवत्क्यातुल्यत्वेन स्तुतित्वं॥ ॥ यश्चेत्यादि· यो निम्बवृक्षं परशुना कुठारेण छिनत्ति· यश्चैनं निम्बं मधुसहितघृतेन सिंचति· य
श्चैनं गंधमाल्याभ्यामर्चति· सर्वस्य कृते सनिम्बः कटुरेव तिक्त एव। पुष्पं पुष्पस्रजो माल्यमित्यमरः। अत्र समासोक्त्या समसनेन न
साम्यापादनेनेति यावदुपमेयनिंदाज्ञानं॥ ॥ लेशलक्षणमाह· दोषस्येति· दोषस्य गुणत्वं गुणस्य च दोषत्वं यत्र तदेव लेशाल
लक्षणं। तर्हि व्याजस्तुतावव्याप्तिं वंतयाचातिव्याप्तिः र तत्र तत इति। तत्तो लेशाद्व्याजस्तुतिरभिन्नेवेति नातिव्याप्तिरित्यर्थः॥ भुवेत्यादि·

या८

स्वयंवरे कस्मिन्नपि स्वपे दर्शितनायां सखीं निवर्त्तयितुं कापि स्तौति यथा जातं निंदति युवत्व गुणित चपलवल स्य एव तत्र पतियोग्यः
यस्य कामोत्सवादपि विषयोत्सवमनादृत्य रणोत्सवे मनः सक्तमासक्तं। निर्विविक्षो रूप नोक्कमिक्षोः कन्यायाः निर्वेशः उपभोग
:स्यादित्यमरः। अत्र विदग्धया सख्या राजकोपशांतये नोगोकुं प्रतिवीर्यप्रकर्षरूपस्तवस्य दोषत्वेपि गुणत्वेनाल्पतयोपन्यसना
लेशोयं दोषस्य गुणीनावलक्षणः। अल्पतयैवात्र लेशता॥ ॥ चपलइत्यादि हे सखि चपलो निर्दय यश्चासौ जनो नवधुः तेन मम किं
किंतु न किमपि येन जने नागः प्रमार्जनाय अपराधपोंछनाय परं चाटवः प्रियवादाः शिक्षिताः। आगोपराधो मंतुश्चेत्यमरः। अ
त्र दोषवदाभासते श्रुतिज्ञातीति दोषाभासोनहृदयेपरमार्थितो दोषः चाटुकारता हि गुणो येन कृतापराधोपि मामनुकूलयन्मानं ने
गं करोति अत एव च तत्रानुरागः तथा च चपलइत्यादिना सखीजनोद्दिष्टं मानेरागात्कर्त्तुमशक्ततया बालया चाटुकारितादोषा
नासो गुणः कोपि दर्शित इति गुणस्य दोषतात्र ॥ ॥ गुणदोषयोर्मिलितयोरेव तत्त्वं लेश इति मतमाह अन्ये इति। समासोक्तिर्गोप
नेन सूचनेन असमासोक्तिः स्फुटसूचनेन॥ गुणानामित्यादि गुणानां बहूनक्षमत्वादीनां दोषात्याद्दोषाद् युधि धुरंधरो गोत्र षोडशि
रायां निपुणं ते गोलः पुन गैरि सेनातोऽनुत्पन्नः किंभूत शोणित मांसपिंडो यस्य इदृशः स्कंधो यस्य सन्नु खं यथा स्यादेवं जीवति
। धुरंवहति धुरि युद्धो रोयस्तु कादितियतः। किणः स्यात्मृत श्रोणिते इति रलकोषः। गलिस्कंध वहनाशक्ते इत्यपि। अत्र शेष जयादेव सम राम
सेन गुणदोषयोरभिधानाल्लेशः॥ ॥ संतइत्यादि संतः सदा दुःखं यथा स्यादेवं जीवंति। कीदृशाः सच्चरितस्य सद्व्यापारस्योदये २१
व्यसनिनश्चासक्ताः। प्राकृनेवं त्वाविनेवेतियंत्रण अनायत्तयोयेषांते। सर्वत्र कार्ये जनानामपवादे दूषणोक्तो चकिताः सतकाः

अत एव दुःखमयता। प्राकृतोऽविविक्तो जनो बन्धोऽस्ति। कीदृशः। अयुत्यनाऽविशेषवतीमतिर्यस्य सः। न सत्तासाधुना कृतेन कार्येण
नैवासत्ताऽसाधुना कार्येण व्याकुलः साध्वसाधुकार्यरहित इत्यर्थः। अत एव कृत्यमिदमिदमकृत्यमिति विचारशून्यहृदयश्च। अत्रा
पि रोषणयादेवलेशतोऽभिधानं॥ दोषगुणीनां वा गुणदोषीणां वा स्थलेषु कथनेन लेश इति पृच्छति। अथेति। उन्नतं दोषेति आध
स्याध्यस्त तस्त्वात्तत्त्वस्य व्याजस्तुत्या विषयीकरणात्तयोरेवान्तर्भाव इत्यर्थः॥ ॥पुंस इत्यादि। पुराणात्पुंसः पुराणपुरुषाद्विलो
ःश्रीः कमला आच्छिद्य गृहीला त्वया परिभुज्यते सेव्यते हे राजन् इक्ष्वाकुरिप विशेषो वंश्यो यस्य तस्य तवेदं किं युज्यते। किं तु नार्ह
तीति निंदा नाम सः अथ च पुराणात् पुंसो वृद्धात् पुरुषात् श्रीः संपदाच्छिद्य त्वया भुज्यत इति तत्त्वार्थः। अत्र श्रीपदे व्याजः स च शु
द्ध एव. तेन च स्तुतिरिह। लेशान्तेदमाह गुणेति॥ ॥प्रिय इत्यादि। हे राजन् प्रियः प्रीतोऽसि। धात्रीवल्लभप्रभृतिरसि। ईश्वरोऽसि। शुद्ध
वंशोऽसि। तरुणोऽसि। एवं सति कति कियन्त्यस्तरुण्यस्त्वां पतिं न तृणतेन स्वीकुर्वन्ति। अतो हे तोरे तां कीर्तिं परामृश्य मा क्रमितुं नवा
न्यार्हति। कीदृशी. रघुनघुषमान्धातृणां नृपविशेषाणां महिषीं महादेवीं अत एव वृद्धां मतिवयस्कां च। महिषी कृताभिषेका या
मित्यमरः। अत्र महिषीवृद्धापदयोर्व्याजात् कपटान्निन्दास्तुतिर्लेश एव॥ ११॥ सहोक्तिलक्षणमाह कार्येति। क्रियादिषु कार्त्री
दीनामन्यैः सहभावः समावेशोऽवस्थानं सा सहोक्तिः। आदिपदात् कर्मादिपरिग्रहः। स समावेशो विविक्तः केवलः अविविक्तो मि
श्रः॥ कोकिलेत्यादि। सुरभिवासरा वसन्तदिवसा जनहर्षैः सह वृद्धिं यान्ति। कीदृशाः। कोकिलालापो मधुरो मनोहरो येषु ते।
सुगन्धयः शीतनगन्धवन्तो वनवायवो मलयानिला येषु ते। अत्र केवलस्य कर्तुर्वसन्तदिनस्य जनानन्दैः सह वृद्धिप्राप्तिक्रियास

भावेशः स च विसदृश एव। दिनवृद्धेर्द्वैगुण्याधिक्यरूपत्वात् आनंदवृद्धेरतिसुखरूपत्वात्॥ ॥ रुष्टासि इत्यादि। उच्यसे प्रियया समदं त
थापि खलु रे नरेणासि किमिति रुष्टेति। उपरि नरेणाज्ञानमुंचति वृषतोऽयं ग्रामानि। अपराधवता केन विदवला डुवेला किमिति
त्वं रुष्टेति पूर्वोक्तमुद्दिश्याह। उच्यसे इति प्रियया समदं सगर्वं यथा स्यात्तथैवं त्वमुच्यसे। प्रियसि। तथापि रे त्वं वदसि किमिति रुष्टासि
त्वमिति। हे अज्ञान। ज्ञानहीन। उपरि नरेण गोष्ठ्यादिगौरवेण वृषतोऽयं ग्रामानि मुंचति त्यजति। किंपुनरबलेति भावः। उच्यस
इति। वद भाषणे कर्मणि लकारः। वद्ल्योरूषणः। रिशादिः साक्षेपसंबोधने। अत्र वदनक्रियायां त्वमिति वा योऽर्थः कर्मीभूतः के
वल एव प्रिया पदार्थेन सह समाविष्टस्तयोश्च विसदृशता व्यक्तैव॥ ॥ विविक्ताया एव लक्षणांतरमाह यत्रेति। यत्रानेकः कर्त्रादि
भिन्नैः क्रियादिभिर्निर्दिश्यंते तन्नाम विविक्तेति कथ्यते॥ वहतेत्यादि। चूतमंजरी पांथानां दृक्तिया सह वर्त्तते। मलयानिलास्तेषां पांथा
नामश्रुभिः सह वहंति। वांति। भ्रश्यंति च। पथिकः पांथ इत्यमरः। अत्र चूतमंजर्यादेस्तत्तत्क्रियायां विवेकेनैव कर्तृत्वेन समावे
शः विसदृशता तु व्यक्तैव॥ ॥ धीरेणेत्यादि। धैर्येण समं यामा हृदयेन सममनिश्चिता अनिश्चिता वा उपदेशाः। उत्साहेन सह भुजा
वाष्पेण समं गलंत्यस्य उल्लापाः। अस्य रामस्य धैर्येण समं यामा रात्रिप्रहरा गलंति। हृदयेन सममनिश्चिता अनिर्णीता अनिश्चिता
वा उपदेशा गलंति। उत्साहेन सह भुजा बाहवो गलंति। वाष्पेण सममुल्लापा आलापा वचनानि गलंति। धैर्यविगमानुचितेन सदु
पदेशावस्थितिः ततो मनः शून्यता ततउत्साहत्यागस्ततोऽश्रुस्खलनं ततोऽश्रुणा सहालापवचनं तेति क्रमेणाधिकार्त्तिर्नो मन्मथदशा राम
धिक्यमुक्तं। उत्साहोऽध्यवसायः। अत्र गलनक्रियायामेकत्वे नाविविक्तता। विसादृश्यं च व्यक्तमेव॥ ॥ धीरत्वेत्यादि। धैर्यमिव २२

भुर

जलसमूहं तिमिमिव धामिव सपक्षपर्वतलोकं। नदीस्रोतांसीव तरंगाढ्यरत्नानीव गुरुकगुणशतानि बृंहंतं। ईदृशं समुद्रं कीदृशं ये
येमिव जलसमूहं वहंतं तिमिमिव वहमिव मत्स्यविशेषसमूहमिव सपक्षं पक्षयुक्तं स्वपक्षं स्वामित्वं वा पर्वतलोकं मैनाकादिकं वहं
तं नदीप्रवाहानिव तरंगान् वहंतं रत्नानीव गुरुकगुणशतानि महत्त्वादीनि वहंतं। अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्ता
र इति रामायणं। समुद्रेपि मतो लोक इति रत्नकोषः। गुरुकेति स्वार्थे कः। अत्र धैर्ये जलसमूहादीनां मिथः सादृश्यं व्यक्तमेव प्र
तीयमानमिव शब्देन द्योत्यते साहित्यं च वाक्यार्थतया गम्यत इति सहोक्तिरियं सादृश्यवती॥ ॥ क्रियादिष्वित्यादि। उदाहरणद्वयोजन
माह· आदीति॥ तदेत्यादि· इमा रात्रयः संप्रति विरहावस्थायां मम श्वासैः सह दीर्घाः समेमि वांगैः सह चंद्रभूषणाश्चंद्रालंकारा
स्ता रात्रयः पांडुराश्च। चंद्रभूषणत्वं रात्रीणां पांडुरत्वे हेतुः। विरहदशायां खेदान्निश्वासदीर्घतांऽगपांडिमा रात्रिदीर्घता च भव
ति। अत्र दीर्घत्वपांडुत्वगुणयोः समावेशः सादृश्यगर्भ एवेति समासादृश्येयं सहोक्तिः॥१२॥ समुच्चयलक्षणमाह द्रव्येति· द्रव्यादी
नामेकक्रियादि समावेशः समुच्चयः। इतरेतरयोगादीनां समुच्चयभेदमाह इतरेति। इतरेतरयोगः परस्परापेक्षावयवभेदा
नुगतः समुच्चयः। समाहारः तिरोहितावयवभेदः संहतिप्रधानः समुच्चय एव। अन्वाचयः यत्रैकं प्रधानमन्यदप्रधानमन्वीय
ते सः। समुच्चयं विभजते· द्विपदेति। भजनये द्विपदबहुपदे। अत्र नये अद्विपदबहुपदे। एषु मध्ये आद्यास्त्रयः प्रतिपदं वोत्तर
पदे द्योतकैः सह भवंतीत्याह· त्रय इति· त्रय एव शब्दा मिश्राश्च भवंति। तुरीयः अत्र नयाश्रयः समुच्चयो द्योतकं चकारादि
कं विनैव भवति॥ निर्यतेत्यादि· दीपकस्य प्रशस्तदीपस्य मदनः कामश्चाधिकं दिप्यते दीप्तो बभूव। कीदृशः। निर्यातागच्छतापरि

अनेन सेवकेन· सख्यादिना च बोधितः प्रकाशितो जागरितश्च ॥ स्फूर्जन्माणी स्फुरंती रुचिर्दीप्तिः रत्नरागश्च यस्य सः। उल्लसंती दशा
वर्तिरवस्था च यस्य सः। द्वारे गृहद्वारे मदनबोधकन्नापि च सेवलने मिलने· तेन मांसलः स्फीतः। दीपक इति प्रशंसायां कन्। दि
घन इति· घन आदीनो लिढिरूपे। अत्र चकाराभ्यां द्वयोरेकक्रियानिवेशनात् समुच्चयः। यदि समुच्चयेन निवेशनं न स्यात्तदादो
षमाह· तेनेति· अन्योन्यनिरपेक्षतया हि वचनं द्वन्द्वश्च स्यादित्यर्थः॥ ॥ निकाममित्यादि· इयं मालती नोऽस्माकं मनो रमयति कं
पयति च। कीदृशी· मदन एव दहनोऽग्निस्तस्माद्दुद्दाहः उत्कृष्टदाहस्तेन विधुरां विक्लवामवस्थां दशामापन्ना प्राप्ता। अत एव नि
काममत्यर्थं न क्षीणांगी। सरसोऽयः कदल्या गर्भे मज्जा· तद्वत्तु न गा मनोहरांऽनेन पांडुरता क्षीणता चोक्ता। चंद्रस्य कला शेषा
कलामात्रावस्थिता मूर्तिरिव नेत्रानंदजननिका· कल्याणी· कुशलवती। कदल्या गर्भपदेनाति पांडुरत्व कोमलत्वे ध्वनिते। उत्क
त कार्यसंपादकतया रमयति। अति पीडयाऽरिष्टाशंकितेवास्मनः कंपनमिहेत्याशयः। अत्र कंपयति चेत्युत्तरपदस्थेन चकारे
णैकत्र मनोलक्षणे द्वयोः क्रियाद्वयनिवेशनात् समुच्चयः। समुच्चयेन निवेशनाभावे दोषमाह· तेनेति· परस्परनैरपेक्ष्ये उत्तरप
दस्य च कारेणावाच्यापत्तिरित्यर्थः॥ ॥ अप्राकृत इत्यादि· स नृपतिर्विस्मयाय कथं नास्तु। कीदृशः अप्राकृतः अनीचो महाज
न इति यावत्। नीचः प्राकृतश्च पृथग्जन इत्यमरः। यस्मिन्करुणा· दयाऽकृतज्ञता· वितता· लक्ष्मीः संपत्तिः सात्विकगुणेन जाज्वल्यमा राम
ने तेजश्च धर्मः सुकृतं मानो ऽविनयः पराक्रमश्च· उवास· वसति स्म। इह कारुणिकस्य करुणामात्रप्रवृत्त्याऽकृतज्ञतायाः साहजि २३
कोऽन्तावद् इति· तथा चास्मिन्नुत्पमिति महाजनतास्य सूचिता। तथा च लक्ष्मीकस्य न किमपि श्लाघाविषय इति स लक्ष्मीकतो

क्ता। तथापि निःसात्त्विकस्य कुतो महात्मत्वमतः सात्त्विकगुणाधिक्यमुक्तं। निःप्रतापस्य सर्वमुक्तं लक्षणमशोभाकरमेव भवती
ति तेजस आधिक्यमुक्तं। नवत्तु यथोक्तगुणसंप्राप्तिरधार्मिके सर्वे गुणा विगुणायंते तदर्थमाह धर्मश्चेति। मानविनयपराक्रमाः
प्रत्येकं महापुरुषविशेषगुणा इति ते एकत्रेति। अत्रानेकपदाश्रितचकारैरेकक्रियायां नानागुणाः समुच्चयेन निवेशिता इ
ति समुच्चयता। तदभावे दोषमाह तेनेति· असमुच्चयनिवेशे करुणादयजम्भुरिति स्यादित्यर्थः। यस्मिन्निति· यद्दिय स्मिन्नित्येक
द्रव्ये गुणसमुच्चयविवक्षात्र तदा सोपि भवतीत्यर्थः॥ ॥रूपमित्यादि· आसां स्त्रीणां रमणेषु विषये इदमिदं कार्मणत्वं वशी
करणे मूलकमित्यमरामत· यथो। अघतिविधाने नानिर्विघ्ने न सहजेनेति यावन्मनोज्ञे रूपं। कायेन न प्रत्यविकाशि· सहजप्र
काशवत् प्रेम· अकृतकः स्वाभाविकः संभ्रम आदरो यत्र· ईदृशो· चाटु· कौशलं च। मूलकमित्तु कार्मणमित्यमरः। अत्र रू
पादयो गुणाः प्रत्यपदस्थितचकारेण गमनरूपक्रियायां समुच्चयेन निवेशिता इति समुच्चयः। तदभावे दोषमाह· अगम
न्निति· असमुच्चये· वक्ष्ये च नंद्वंद्व श्च स्यादित्यर्थः। अयमेव गुणानां कार्मणत्वजात्यामसमुच्चयेन जातिसमुच्चयोपीत्याह·
कार्मणत्वमिति॥ ॥विचिंत्येत्यादि· इदं लोकेषु भुवनेषु मध्ये देहिनां प्राणिनां विचिंत्यमाने मनसापि दुर्लभमेव च कास्ति·
हिरवधारणे। किं तत्सचंद्रारात्रिः सकलं समग्रं· प्रियाया अनुरागः प्रीतिः अभिनवं यौवनं च। अत्र द्वंद्वशोयुगलत्वे नात्यपदस्थितच
कारेणैकक्रियानिवेशः। तदभावे दोषमाह तेनेति। दुर्लभत्वविवक्षया दुःखमयत्वे गुणसमुच्चयोपीत्याह· अथमिति॥ ॥आदि
त्येत्यादि· अनिलो वायुः अनलोग्निः द्यौराकाशः आपो जलं· हृदयं· अहो दिनं· उभे प्रातः सायं। धर्मो विधाता· अयमपे च जनस्य वृ

२५

तं चरित्रं जानाति। आदित्यचंद्रौ जानीत इति विभक्तिविपरिणामेनान्वयः। धर्मो गुणादौ लोकेशे इति रत्नकोषः। अत्रादित्याद
य उत्तरपदद्वतिपदनिवेशि चकारेणैकक्रियायां निवेशिता इति मिश्रता तदभावे दोषमाह तेनेति॥ ॥ अत्र नयेति· यत्र हि पदे
वहुपदे वा चकारो नास्ति तत्र समुच्चयो ऽन्वाचयो पि न भवति। दीपकलक्षणेन तस्य विषयीकरणात्· एकत्र वर्त्तिना क्रियादिवाचक
पदेन सर्वेषां कोपकारकत्वस्य दीपकत्वात्· तादृशसमुच्चयान्वाचययोश्च तत्त्वादित्याशयः॥ सावशेषेत्यादि· आसां स्त्रीणामि
तानि मदविभ्रमं मत्तताविलासं द्योतयंति स्म। तान्याह· सहावशेषैरवशिष्टभागैर्वर्त्तते· सावशेषं सखंडं पदं यत्र ईदृशमुक्तं व
चनं खंडाक्षरवचनमित्यर्थः· पिपिप्रियसस्वयमित्यादि। भ्रंस्तानि स्खलितानि यानि मालावस्त्रालंकरणानि· तेषूपेक्षा· अस
म्वरणं। अकारणतो हेतुं विनैव गंतुं गमनं कर्त्तुमुत्थितमुत्थानं च। उक्तमिति भावेक्तः। उत्थितमित्यपि भावेक्तः। अकारणत इ
ति पंचम्यां तसिः। अत्रोक्तादेर्वचनादिरूपक्रियात्मकस्य तदाश्रयस्य द्रव्यस्य मिथो योगेन प्रधानक्रियायां निवेशः अत एव द्योत
यंतीति वहुवचनं। समुच्चयस्वीकारे दोषमाह· हंहेति॥ ॥ वपुरित्यादि· हे वालमृगाक्षि· शिशुहरिणनेत्रे· गौरि· वरेषु यन्मृग्य
ते· अभिवांछितं तत्त्रिलोचने शिवे व्यस्तमप्येकैकमप्यस्ति किं किंतु नास्त्येव। तदाह· वपुः शरीरं विरूपं विरूपमक्षि यत्र तादृशं विरू
पं· विरुद्धस्वरूपं नेत्रे द्वित्वसंबंधस्याविरुद्धत्वात्· त्रित्वस्य विरुद्धत्वात्। अलक्ष्यमलक्षणीयं जन्म उत्पत्तिः कुलमिति यावत् यस्य
सो ऽलक्ष्यजन्मा· तस्य भावो ऽलक्ष्यजन्मता· अकुलीनतेत्यर्थः। दिश एवाम्बरं यस्य तद्भावेन वसु धनं निवेदितं कथितं। नग्नो ऽवासा राम
दिगम्बर इत्यमरः। मृग्यत इति· मृगप्राथने कर्मणि लकारः। अत्र वपुरादिसमुदाये यदा स्फुटावयवभेदता तदेतरेतरयो २८

गः यदा तु तिरोहितावयवभेदता तदा समाहारः यदित्येकत्वक्लीवत्वाभ्यामिह समाहार एवोक्तः॥ ॥ चकारयोगेपीतरेतरयो
गमाह चेति॥ तल्लक्षणमित्यादि· सा तु वदना गौरी· शूलिनो हरस्य मदनस्य मतनायाश्च हयोर्वशवर्तिनी· आयत्ता वभूव। हयोः की
दृशयोः तत्कालेविपरिवर्तिताविगताक्रीलिज्जाययोः तयोः इह उपचितो रागो ययोः तयोः। अत एव शयनेनेष्टतोः ओध्यानेक्षतो
ः। अत्र शूलिमदनयोर्वशवर्तित्वे इतरेतरयोगेन सन्निवेशो द्यो॰ तमाह तदेति। वहुपदाश्रयउत्तरपदाश्रितचकारेणेतरेतरयोगो
भवतीत्याह एवमिति। समाहार इति· विचिंत्यमानमिति श्लोके इदमित्येकत्वक्लीवत्वाभ्यां समाहार उक्त इत्यर्थः। इत्यादिविषयत्वे इ
तरेतरयोगस्समाहारयोः सत्यादन्वाचयेविषयोत्तरमाह· क्रियेति॥ गच्छंतीनामिति· तत्र स्त्रीणां सौदामिन्या विद्युता तत्पूर्वी ह्यमिंदर्शि
य। कीदृशीनां नक्तं रात्रौ पतिगृहं गच्छंतीनां। कस्मिन्सति· सूच्यग्रभेदनीये अंधकारे राजमार्गे अवरुद्धदर्शने सति। सौदामिन्या कीदृ
श्या· कनकस्य हिरण्यस्य निकषः कषपट्टिकायां कषणरेखा· तद्वत् स्निग्धया· रम्यया। तोयत्यागस्तनितमुखरस्त्वं मा भूर्नव· यतस्ता भू॰ रा॰ ५
नार्यो विक्लवा विह्वलाः स्युः। निकषः कषरेखायां पट्टिकायां कषस्य चेति मेदिनिकरः। स्तनितं घनगर्जितमित्यमरः। मा स्म इति त्वत्र
न माङ्योग इत्यट्निषेधः। अत्राद्यक्रियायुक्तात् द्वितीयक्रियायामन्वाचयः। समुच्चयादेकमाह· निमेति· समुच्चये एककालि
क एकविषये ऽन्वयोऽत्र त्वन्वये कालभेदो विषयभेदश्चेति भेदादित्यर्थः। उक्तवैधर्म्ययोः समुच्चये सत्वमाशंक्य परिहरति· कीति
ति· समुच्चये उभयधर्मवत्वेपि समुच्चयत्वेनैव विषयापहार इह तु विवक्षयैव विनिगमनेत्याशयः॥ ॥ वागर्थावित्यादि· अहं गौ
रीहरौ वंदे· नमामि। किमर्थं वाक्काव्यर्थश्च तयोः प्रतिपत्तये निश्चयाय। कीदृशौ वागर्थाविव· शब्दतदभिधेयाविव संपृक्तौ संबद्धौ य

ति २

मा शब्दस्तद्वाच्योऽर्थश्च द्वौ नित्यसंबद्धौ वाच्यवाचकाख्यसंबंधेन· तथा यौ नित्यसंबद्धावित्यर्थः। जगतो लोकस्य पितरौ मातृजनकौ
। पिता च माता च· द्वन्द्वे पिता मात्रेत्येकशेषे पितराविति। पार्वत्या मातृत्वेन मातुश्चातिगौरवेणाभ्यर्हितत्वात् पूर्वनिपातः। सह
स्रेणापि पितुर्माता गौरवेणातिरिच्यत इति स्मृतिः। अनेनार्द्धनारीश्वर उक्तः। यद्वा· पार्वतीं पातीति पार्वतीपो हरः रमाया लक्ष्म्या ईश्व
रो हरिस्तौ वंदे। यद्वा पार्वतीपरो हरो. मा या लक्ष्म्या ईश्वरो हरि. स्तौ. हरहरी वंदे। कीदृशौ. लोकस्य पितरौ जनकौ· अन्यत्तुल्यमे
२५ व। एतेन हरिहररूपमुक्तमिति कृत्वा स्या. रमा लक्ष्म्यामपीष्यत इति विश्वः। मा च लक्ष्मीर्निगद्यत इत्येकाक्षरः। परवल्लिंगता अ
र्थशब्दलिंगता। संपृक्ता च· संपृक्तश्चेत्यत्र पुमान् स्त्रियेत्येकशेषः। अत एवोक्तेर्वक्रतये सालंकारता· न च धवखदिरावित्यादिषु
वक्रोक्तिरतो नालंकारता॥ ॥ स्त्रीणामित्यादि· यत्र नगरे मनोभुवा कामेन तन्मुखे स्त्रीणां मुखेऽक्षिश्रवनिर्जने नेत्रभ्रूव्याजे शारका
र्मुकं न्यस्तमारोपितं। स्त्रीणां हावैः शृंगारजक्रियाभिर्निजकार्यमनश्चापलादौ कृते सति। हावः क्रियाशृंगारभावजेत्यमरः। अ
त्रापि विशेषलक्षणाभ्यामेव वक्रोक्तिता॥१२॥ आक्षेपं लक्षयति विधिनेति· विधिना हेतुना प्रतिषेधेन वा हेतुनाया प्रतिषेधस्यो
क्तिर्निर्वचनं· स आक्षेपः। रोधः पुनराक्षेप एवेत्याह· रोध इति· आक्षेपलक्षणेनैव गृहीतत्वाद्रोधो न ततो भिन्न इत्यर्थः॥ गच्छेत्या
दि· दूह हे कांत व अत्र गमनस्य विधिरूपस्य जन्म भूयादित्यनेन विधिरूपेणैव त्वयि गते मया मर्तव्यमिति मरणसूचना [illegible] राम
[illegible] द्विधिना गमनप्रतिषेधोक्तिः। अन्यासंकरेण च स्फुटता॥ ॥ अलमित्यादि· त्वया यथा श्रुतं· तत्र विवादेनालं. निःफलं। अशेषं २५
समर्थं यथा स्यादेवं सता वन्नत्याविषय एवास्ति· मम मनोऽत्र भावैकरसमभिप्रायवशं स्थितमस्ति· यद्यपि जवे विरूपासत्वादिकं

× त्वन्नवेद्यद्गच्छसि तदा गच्छ विदेशमिति शेषः। मया न रोधः क्रियते. किंतु यत्र जवान् गतो भूयात् तत्रैव ममापि जन्म भूयात् इति परं वदामीति शेषः २

त्वदुक्तं वर्त्तते तथापि मन्मनस्त्वदेकपरमित्यर्थः। अत्र हेतुः कामवृत्तिरिक्तायाः परोऽवचनीयं वक्तव्यं नेत्यत्तेन पश्यति। इच्छानपरा
र्थयोऽप्यानवतीत्यर्थः। अत्र निषेधविधिश्चोतनात्मतस्थापनरूपस्य विधेर्विधिनिषेधाभ्यामाक्षेप इति विध्याक्षेपोऽयं मिश्रः॥ ॥ कुत इत्या
दि। हे कलभाषिणि मधुरवचने कस्मान्नीलोत्पलं कर्णे करोषि। कुत इति प्रतिषेधे हेतुमाह अस्मिन्कर्मणि कामिवशीकरणादौ किम
पाङ्गं नेत्रप्रान्तमपर्याप्तमसमर्थं त्वं मन्यसे। अत्र निषेधस्य निषेधपर्यवसायिवाक्येनाक्षेपनीति निषेधाक्षेपः शुद्धता च केवलत्वेन॥ ॥
सत्यमित्यादि। सत्यं गुरवो गिरयः को न गणति जलाशया न गंभीराः। धीरे रूपमातुं तथापि मम नास्त्युत्साहः। इह पूर्वं निश्चितं गुरु
त्वाश्रयाः को वदति जलाशयाः सागरा न गंभीराः किंतु गंभीरा एव गिरिसागरौ धीरे: सदृशोपमातुं सदृशीकर्तुं तथापि मम मनो
त्साहोऽस्ति धीराणां तयोराधिक्यात्। जलाशयो जलाधार इति को बाध्ये अपि जलाशयपदं जलाधारमात्रार्थकं तथा यति गांभीर्य
योग्यतया सागरपरं। अत्र विधिनिषेधाभ्यां गुरुत्वगांभीर्यनिषेधो न्यायपक्षया विधिश्चेति मिश्रता॥ ॥ शेषविशेषमाह। क्रियास्विति।
क्रियास्वर्घोगिनां हेतुद्वारा यन्निवारणमुक्त्याप्युक्त्या च स रोधः सच द्वेधीभूत आक्षेप एव। विधिनिषेधयोगिलमथाक्षेपसाधारण्यं
॥ किमित्यादि। किं जल्पितेन दशमुख। जल्पितसदृशमनिर्वाहयतो नरं। एतदेव जल्पितसारं निधनमन्येऽपि वज्रधारास्तु गताः।
इह हे दशमुख रावण जल्पितेन भाषितेन किं किंतु न किमपि। कस्य उक्तिसदृशं नरमनिर्वाहयतः पुंसः। नरमध्यवसायं।
एतदेव जल्पितसारं श्रेष्ठं यदन्येऽपि योधा वज्रधारास्तु निधनं नाशं गताः। श्रेष्ठार्थवत्सारमुदाहरंतीति शाश्वतः। अत्र जल्पन्रराव
णश्चित्ररथेन वज्रप्रभावकीर्तनरूपप्रतिकूलोक्त्या रुद्ध इति विध्याक्षेपरोधः॥ ॥ हंतुमित्यादि। हंतुं विमार्गयमाणो हंतुं वीर

तस्यात्मना दशवदने। किमिच्छसि कर्तुं प्लवगाधिपते प्रियमिति विप्रियं रघुपतेः। इह हे प्लवगपते सुग्रीव दशवदने हंतुं विमार्गय-
माणे याचमानस्त्वं रघुपते रामस्य किं प्रियमिति कृत्वा विप्रियमनिष्टं कर्तुमिच्छसि। कथं विप्रियतेत्याह। कीदृशस्य दशवदनमि-
वात्मना हंतुं त्वरितस्य प्रभुणा जिघांसितस्य हि वधेऽपराध इति स एव पुरुषोत्तमस्तं घातयतु स मे तेन वदादिति। साहाय्येतामि-
त्याशयः। यच्छब्दोऽव्ययत्वेनानेकार्थतया संबोधनार्थः। यद्वा जेशब्दः पादपूरणे। दशवदनपदमाकांक्षाक्रमेणाकृष्य त्वाहननहृ-
26 यान्वयि। अत्र रावणवधोद्यमो विधिरुत्कैव ज्ञाम्यवता रुद्धोऽनुकूलतया हेतुमुद्भावयतीति रोधोयं विध्याक्षेपश्शेषः॥ ॥ गच्छेत्यादि
हे सखि त्वत्प्रियं गच्छेति वक्तुमिच्छामि न त्वप्रियैषिणी। स्त्रीत्वेन स्त्रीप्रियत्वात् मा गा इति वाणी मम मुखान्निर्गच्छतीति किं करोमि।
न त्वप्रियं त्वत्प्रियैषिणीति। पाठे त्वत्प्रियैषिण्यहं गच्छेति विवक्ष्यामि। मत्प्रियं यथा भवति तथा मा गा इति वाणी निःसरतीति यो-
ज्यं। अत्र किं करोमीत्यस्य युक्त्या प्रकृतोपपत्त्यानिष्टार्थतावगमः। यदि वैयात्यात्प्रागच्छ्याद्विपरीतमभिधत्ते। मा गच्छेति वक्तुमि-
च्छामि गच्छेति वाणी निःसरतीत्यत्र किं करोमीति तदा युक्तिसिद्ध एव रोधोयं॥ ॥ पउरइत्यादि। प्रचुरयुवको ग्रामो मधुमासो
यौवनं पतिः स्थविरः। जीर्णसुरा स्वाधीना असती मा भवतु किं प्रियता। काचिद्वृद्धपतिका चलचित्ता निजालीकथाचितरकस्थे
चित्तकथितं। सा तु तत्रोत्तरमाह। प्रचुर इति। ग्रामः प्रचुरा वरयुवानो यत्र। तादृशः। शेषाहिताधेति कप्र। मधुमासो राम
वसंतः। यौवनं। स्वामी स्थविरो वृद्धः। जीर्णसुरा पुराणमद्यं स्वाधीनं निजायत्तं मत्तोऽसती सा मा भवतु किं प्रियता। यद्यस्मिन् २६
वसरे साचंचला न स्यान्म्रियते वेत्यर्थः। सुरा जीर्णा प्रीतिकरीति मद्यपप्रसिद्धिः। अत्र किं प्रियतामिति किमः काकुगर्भतया सा

स्तूयश्चार्थितापुत्त्यानिषेधविषयिणीज्ञायत इति रोधोयं ॥ ॥ कांतेत्यादि· कथं माद्वीयतां मध्यो ऽस्याः कंदोट्टदलसदृशाभ्यां
।अक्षिभ्यां यो न दृश्यते. घनस्तनभररुद्धप्रसराभ्यां। इह अस्या नायिकाया मध्यः कथं माद्वीयतां न क्षीणतां यातु। यो ऽस्याः कुवल
यदलतुल्याभ्यामक्षिभ्यां निबिलकुचभरावरुद्धगताभ्यां न दृश्यते। अत्रानयानेत्राभ्यामन्यमीक्षमाणया यथा ऽहं न दृष्ट इत्यहं क्षी
णस्तथा मध्योपि तेनैव क्षीणतामपत्र इति लक्ष्यते· इहापि किमो निषेधार्थत्वं युक्तिचैव ज्ञायते ॥ ॥ भ्रूकुटिरित्यादि· इयमतिप्रगुता·
बलात्कारः हियतो ऽकोपवानपि जनो बलात्कारेण कोपवानृक्रियते। तदाह· त्वया भ्रूकुटिभ्रू कौटिल्यमारचितं। अयतो अथे
गतं। अनंतरमाननं चुम्बनादपहृतं। असाधूक्तं च। वा शब्दश्चार्थे। अत्र धार्ष्ट्यं न प्रतिकूलकारणमुपन्यस्य काक्वा वाचनिक एवोपा
लंभः। अस्या अधार्ष्ट्यपक्षे स्वरूपाख्यानपरोमिदमिति स्तुत्वा अनुकूलनिषेधाक्षेपरोधोयमित्याह· अयमिति ॥ ॥ गमिअ इत्यादि·
·गमिताः कदम्बवाता दृष्टं मेघांधकारितं गगनतलं। सोढो गर्जितशब्दस्तथापि खल्वस्य नास्ति जीविते आसंघः। इह अस्य रामस्य
तथापि जीविते प्राणधारणे आसंघो ऽध्यवसायो नास्ति· खलु निश्चये वाक्यभूषायां वा। यद्यपि कदंबपुष्पसंपर्किणो वाता गमिता नी
ताः दृष्टं मेघांधकारयुक्तं गगनतले। गर्जितरूपः शब्दः सोढः श्रुतः। इहासह्यसहनेपि जीवितानध्यवसाये प्रमातिशयो हेतुः प्र
याणोचितकाले शरद्यपि यदि न गमनं स्यात्तदा प्रियासमागमोपि न स्यादिति बुद्धिः· यद्वा नेतव्यकालस्य घोरत्वाद्दुर्गवासरूपोऽ
ध्यवसायः यद्वा· कदम्बवाता गमिता· विकसदमलकमलवाताः कथं गमितव्याः मेघांधकारिते गगनतले दृष्टे शरच्चंद्रश्चंद्रि
कायवलितं कथं द्रष्टव्यं गर्जितशब्दः सोढः कलहंसकलरवः कथं सोढव्य इति· विमर्षेणानध्यवसायः। यद्वा· एते रेवा नर्थसार्थे

ः कदर्थिता। व्यर्थप्रत्याशा समर्थना सीत्। यदि हता स्यात्तदा मदीयाशा गता शएव न वेद्मीति बुद्ध्यानध्यवसायः। अत्र जीवनक्रियाया
मुपस्थितस्य निरोधः किंतु कारणाक्षेपएवेत्याक्षेपता॥ ॥गन्तव्यमित्यादि· हे प्रिय· यद्यपि ते तव पथे वक्तृ प्रयुरंलघ्वं प्राप्तं वर्त्मनि सुखं· न
दुर्गमो मार्गः क्षेमः कुशलं च चौराद्युपहतेः न च मम प्राणसंशयोस्ति तथापि त्वं मा गाः स्म· मा यासीः स्म। कुशलं क्षेमम मद्रिया मित्य
२१ मरः। अत्र प्रवृत्तरथनलानादिहेतूनां गमनपरत्वेनाक्षेपता॥१४॥ अर्थान्तरन्यासं लक्षयति ज्ञेय इति· किंचन किमपि वस्तुवाच्यं
प्रस्तुत्य प्रक्रम्य। तद्वस्तु साधनसमर्थस्यान्यस्य वस्तुनो वाक्यार्थस्य न्यासउपन्यासो यः सोऽर्थान्तरन्यासः। वैपरीत्यं विपर्ययः॥प
योमुच इत्यादि· एते मेघाः शरीरिणां परितापं हरंति। ननु निश्चये महतामामनतान्नोऽवस्थितिः परदुःखोपशांत्यर्थं भवति। अत्र
पूर्वार्द्धोपस्थापितार्थसिद्धये साधर्म्यपुरस्कारेणोत्तरार्द्धोपन्यासः स्फुटएव॥ ॥प्रियेणेत्यादि· काचिन्नारीलताविलासमपि स्रजं
मालां न विजहाति त्याज। कीदृशीं। प्रियेण संग्रथ्य ग्रथित्वा। मांसलकुचवति हृदये विपक्षस्य सपत्न्याः समीपेऽप्यर्पितामारोपि
तां। अत्रोपपत्तिमाह· श्रियतः प्रश्रिपीतो गुणा वसंति· न वस्तुनि गुणा वसंति। अत्र जलाविलमालाया अत्यागहेतुर्वसंतीत्या
दिना वैधर्म्यपुरस्कारेणोक्तः॥ ॥जो इत्यादि· यो यस्य हृदये दयितो दुःखं दददपि स तथा तस्य। दयितनखदुःखितानामपि व
ड्ढित स्तनानां रोमांचः। इह· यो यस्य हृदयप्रियः स दुःखं ददपि तस्य तथा प्रिय एव। अत्र हेतुः दयितनखनदुःखितानामपि
स्तनानां रोमांचो वर्द्धते। ददद् इत्यत्र नाभ्यस्ताच्छतुरिति नुम्निषेधः। अत्र प्रथमं हेतुरुक्तस्ततस्तत्कार्यमुक्तमिति विपरीत राम
ता॥ ॥उक्तन्यासस्यार्थान्तरन्यासाद्भेदमाह· प्रोक्तइति। प्रत्यनीकः परिपंथी प्रतीकोऽवयवएकदेशइतियावत्। अं २१

गंधवतीकोऽश्वत्थवदित्यमरः॥ ते विरला इत्यादि· ते विरलाः सत्पुरुषा ये अनभ्यर्थ्यमाना घटंते कार्योलापं। स्तोका एव तेपि द्रुमा ये
अज्ञातकुसुमनिर्गमा ददति फलं। इह ते सज्जना विरलाः परिमिता अल्पा इति यावत्। ये कार्यार्थमालापमात्रमनभ्यर्थ्यमाना
घटंते कार्यारूढा भवंति। तेपि द्रुमाः स्तोका एवाल्पा एव· ये अज्ञातपुष्पोद्गमाः संतः फलं ददति। अनभ्यर्थ्यमाना इति लिङ्गे श्लेषोस्ति गौ२
न हि कमपि कर्त्ता। यद्वा· कार्यालापि कार्यकरणे घटंते। कीदृशा अनभ्यर्थ्यमाना अनुक्ताः। आलापो वचने कृताविति शाश्वतः। अत्र
हेतुहेतुमद्भावापुरस्कारेण नयोरुपन्यासः॥ ॥ विरला इत्यादि· विरला उपकृत्य निरपेक्षा जलधरा इव व्रजंति। क्षीयंते ते
षां विरहे विरला एव सरित्प्रवाहा इव। इह· ये उपकृत्य· उपकारं कृत्वा निरपेक्षाः प्रत्युपकारानपेक्षा गच्छंति· ते विरलाः
अल्पाः मेघा इव· यथा मेघा उपकारं कृत्वा प्रत्युपकारनिस्पृहा गच्छंति तथेत्यर्थः। तेषामुपकारिणां विरहे विरला एव क्षीयंते
दुःखिता भवंति नदीप्रवाहा इव· यथा नदीप्रवाहा उपकारिणां मेघानां विरहे क्षीणा भवंति तथेत्यर्थः। क्षीयंत इति कर्मकर्त्त
रि· क्षियोऽनात्मनेपदित्वात्। अवसदनमवसादः। भावे घञ्। अत्र मेघनदीप्रवाहयोर्मिथः समर्थयोः प्रत्यनीकभावः प्रति
पक्षता। प्रतिः प्रतिनिधीभूतमनीकं सैन्यं यस्य स प्रत्यनीकः परिपंथी। प्रतिः प्रतिनिधौ चिह्ने इति मेदिनिकरः। अनीकोऽस्त्री
रणे सैन्ये इति च॥ ॥ काकथेत्यादि· बाणसंधाने धनुषि बाणारोपणे तस्य का कथा· तेन सर्वं सिद्धेः। यतः स राजा दूरात् ज्या
शब्देनैव विघ्नान्यपोहति वारयति। ज्याशब्देन कीदृशेन धनुषो हुंकारेणेव· चापस्य हुंकारतुल्येनेत्यर्थः। दूरत इति पंचम्यो
तसिः। विघ्नानीति· यद्यपि विघ्नोंतरायः प्रत्यूह इत्यमराद्विघ्नशब्दः पुंस्त्वे तथापि लिंगमशिष्यं लोकाश्रयत्वादिति नपुंसकत्वमपि·

अत एव· अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणामिति प्रयोगेऽपि । स हि विघ्नानपोहतीति वा पाठः कर्तव्यः । अत्र व्याशाद्रू
पस्य वापैकदेशस्य न्यसनात् प्रतीकन्यासता ॥१५॥ विशेषोक्तिलक्षणमाह· गुणेति· विशेषदर्शनाय· आविष्कारव्यापनार्थं गुणा
दीनां मध्ये यत्तेषां वैकल्यदर्शनं विकलत्वाभिधानं सा विशेषोक्तिः । एकगुणहानिकल्पनया शेषगुणदार्ढ्यं विशेषोक्तिरिति लक्षणं
। एवं जात्यादावपि· आदिपदाद् द्रव्यसंग्रहः । विशेषदर्शनायेत्यनेन न विनाव नातोऽत्र नेदत्रकः तत्र हि नातिशयो वाच्य इत्यर्कं तु कारणांत
र· मिह तु गुणादिप्रतिषेधे न पदार्थानामतिशय इति । गुणादीनां वैकल्यादर्शनेऽपि सा भवतीत्याह· वैकल्येति ॥ न कठोरमित्या
२८ द्वि· कामस्य प्रहरणं न कठिनं न वा निशितं· तथाप्यनुना कामेन लोकत्रयं जितमभवासीत् । पुष्पधन्वनः इत्यनेनाकठोरत्वमती
क्ष्णत्वं च दर्शितं पुष्पस्यैवास्त्रत्वात् । अत्र काठिन्यादिगुणवैकल्यमतिशयविजयप्रदर्शनायोक्तमिति गुणवैकल्यवतीयं ॥
॥ न देवेत्यादि· एषा न देवकन्या नापि गंधर्ववंशजा· तथापि वेधसो ब्रह्मणोऽपि तपोभंगविधाने समर्था । अत्र देवत्वादिजा
तिनिषेधो विशेषस्तु मानुषीत्वेन तत्कार्यकरणं ॥ ॥ न बद्धेत्यादि· भ्रूभंगो न बद्धः अधरोऽपि न स्फुरितः दृष्टिरपि न रक्ता हृता·
तथापि त्वया वीर द्विषतां शत्रूणां कुलं जितं· अत्र भ्रुकुटीत्वादिक्रियानिषेधात् क्रियावैकल्यं· अतिशयस्तु लीलया शत्रुजयः ॥
न रथा इत्यादि· न रथाः न च हस्तिनः नाश्वा न वा पदातयः संति· तथापि स्त्रीणामपांगदृष्ट्यैव कटाक्षेणैव लोकत्रयं जीयते । हस्त्य
श्वरथपादातं सेनांगं स्याच्चतुर्विधमित्यमरः । तदिह सेनांगनिषेधाद् द्रव्यवैकल्यं· अतिशयस्तु तदभावेऽपि त्रिभुवनजयः ॥ ॥ राम
द्रव्यस्यापि वैकल्ये न एकदेशविकलतयाऽपरा विशेषोक्तिः प्रथमा द्रव्यवैकल्यवतीयं तु द्रव्यैकदेशवैकल्यवतीति भेदः ॥ २८

एकेत्यादि· रथस्यैकं चक्रं यत्तासारथिरनूरुर्विकलश्चरणहीनः अश्वाविषमाः सप्त तथापि रविस्तेजस्वी जगत्त्रयमाक्रामति। स
त्त्वाधानवदेति नइति नीतो निषेधः। आक्रामतीत्यत्रोक्रमनीनावादाक्वे क्रमनइति नतङ्। अत्र रथादीनामेकदेशविकलते
तिद्वितीयेयं॥ ॥अयमित्यादि· अयमेसो वाङ्कूले तया स्त्रियारति दोलात्रिंशीसेन निपीडितइत्येकएवार्थं ममोगेत्ती· रम्यः
शेषमंगेभूमिर्नरः नारब्जनकं। शेषशब्दः कर्मघञन्तो वाच्यलिंगः। अंगनरशब्दयोरजहल्लिंगतयाऽन्वयः। अत्राविकल्पदर्शने
पि विशेषोक्तेरियमन्याभवति। यद्यनेन वाक्येनोर्वश्यागुणविशेषवत्त्वं ज्ञानं तदोक्तलक्षणाभावात् पर्यायोक्तिरेवेत्याहुः यत्तु
नरीति॥१९॥ परिकरं लक्षयति· क्रियेति· क्रियाधात्वर्थः कारकं कर्मादि· संबंधी· संबंधवान्· साध्यं· सिसाधयिषितं· दृष्टांतो
निदर्शनं· वस्तुपदार्थः एषु क्रियापदादेरुपस्कारः परिष्कारः परिकरः। साभिप्रायविशेषणेन विशेष्योक्तिः परिकर इति
लक्षणं॥ व्यवसिअ इत्यादि· व्यवसितनिवेदितार्थः समाकृतिलब्धप्रत्यया गतहर्षं। सुग्रीवेणोरः स्थलवनमालामृदितमधु
करमुपगूढः। इह सविशेषणः सुग्रीवेणोपगूढ आलिंगितः। कीदृशः व्यवसितस्य व्यवसायस्य निवेदितोर्थो येन सः। य
द्वा· व्यवसितश्चिकीर्षितो रामसाहाय्यरूपो निवेदितोर्थो येन सः। मारुतिनाहनूमता लब्धप्रत्ययेन प्राप्तविश्वासेनागतहर्षं
यथास्यादेवं। उरः स्थलस्थवनमालायां मृदितामधुकरा यत्र तद्यथास्यादेवमित्युपगूहनक्रियाया विशेषणद्वयं। प्रत्ययः
शपथेत्ताभिविश्वासाचारहेतुर्घितिमेदिनिकरः। अत्र प्रधानक्रियाया विशेषणद्वयेन परिष्कृतत्वात्क्रियापरिकरत्वं॥
॥पलिअ इत्यादि· पतिताच हस्तशिथिलितनिरोधपांडुरसमुल्लसत्कपोला। प्रेरितवामपयोधरविषमोन्नतदक्षिणस्त

नीजनकसुता। इह जनकसुता सीता पतिता च न केवलं मूर्छिता किंतु पतितापीति चकारार्थः। कीदृशी हस्तेन शिथिलीकृतो निरो
धोयंत्रणं कपोलस्य अत एव पाणिपीडनत्यागात् पांडुरः समुच्छूनश्च कपोलो यस्याः सा। यद्वा हस्तग्रहतनिरोधेन तत्संपर्कात् पां
डुरः पीडनत्यागात् समुच्छूनश्च कपोलो यस्याः सा। प्रेरितेन वामेन पयोधरेण स्तनेन नाविषमस्तिरश्चीनं उन्नतो दक्षिणः स्तनो यस्या
29 :सा च। वामस्तनस्याधरेणं चलनमत्र रामादर्चिरजाविरहदुःखापनयनमिति सूचकं। यद्वा स्त्रीणां वामः स्तनो निजो दक्षिणः पुरु
षस्येति तेनैव पतिता। अत्र कर्तुः कारकतया तद्वाचकपदमेव परिष्कृतं॥ ॥उन्मूलिआ इत्यादि। उन्मूलितानां खंडितानि उत्क्षि
प्यमानीनामृजुकमपसृतानि। नीयमानानां निरायतानि गिरीणां मार्गेण प्रस्थितानि नदीस्रोतांसि। इह गिरीणां मार्गेण नदीस्रो
तांसि प्रस्थितानि। कीदृशानां कीदृशानि च उन्मूलितानां चालनतः खंडितानि। उत्क्षिप्यमानीनामृजुकमवक्रं यथा स्यादेवं
मपसृतानि। नीयमानानां निरायतानि वेगवशाद्वक्राणि च। अत्र नदीप्रवाहस्य संबंधिनो विशेषणैः परिष्कारः॥ ॥धीरमि
त्यादि। धैर्यं हरति विषादो विनयं यौवनमदोऽनंगो लज्जां। एकांतगृहीतपक्षः किं शिष्यते यत्स्थापयति वयःपरिणामः। इह वि
षादो धैर्यं हरति। विनयमनौद्धत्यं वशित्वं वा यौवनमदो हरति। अनंगो लज्जां हरति। एकांतेन गृहीतः पक्षो येन स अद्भुत इत्य
र्थः। यद्वा अंतः स्वरूपे एको गृहीतपक्षः सर्वहरस्वरूपो येन स वयःपरिणामो यत्स्थापयति स्थिरीकरोति तत् किं शिष्यते अव
शिष्यते। किंतु सर्वमेव हरतीति भावः। अत्र साध्यस्य दृष्टांतैः परिष्कारः॥ ॥नमजेत्यादि मध्यस्थितधरणिधरं श्रोणितेव समुद्रमं राम
डलमुद्वेले। रविरथवेगविगालिते पतितमिवोत्कटाक्षकोटिचक्रं। इह समुद्रमंडले शोणितेव च। चः पूर्वापेक्षया समुच्चये। कीदृशं २९

* वेलातत्तीरनीरयोरित्यमरः

मध्यस्थितो धरणिधरो मंदरगिरिर्यत्र तत्र· अत एव उद्वेलं उद्गतजलं। सूर्यरथवेगेन स्खलितमनंतरं पतितं चक्रमिव। चक्रं कीदृ
शं उत्कटा उद्भटा अक्षकोटिश्चक्राग्रं यत्र तत्र। अक्षश्चक्रेऽपि पाशके इति विश्वः। अत्र दृष्टांतस्य सामर्थ्यविशेषणैः परिष्कारः॥ ॥
देवीत्यादि· देवी गौरी पुत्रं अस्रूत· सूतेस्म· ततो हे गणा नृत्यत· नृत्यं कुरुत· किं तिष्ठत· किमुपविष्टा भवथ· इति कृत्वा उद्भुजे उत्तोलि
तबाहौ शृंगरिटौ शृंगिनामके गणे चामुंडया आलिंगिते सति· तयोः शृंगरिटिचामुंडयोः रवः शब्दो वो युष्मान् पायात् रक्षतु। चामु
ण्डया कीदृश्या· हर्षोद्दाहृता उक्ता गीः शृंगिरिटिवाणी यया तया। रवः कीदृशः· परस्परांगसंवेधेन जर्जरे स्फुटिते यज्जीर्णस्थू
लास्थि तस्माज्जन्म उत्पत्तिर्यस्य सः। जिता देवदुंदुभेर्द्वन्द्वभेर्यो निखिलध्वानस्य प्रवृत्तिर्येन सः। भेर्यामानकदुंदुभी इत्यमरः। अ
त्र शब्दविशेषस्य वस्तुत्वेन वाच्यत्वेन गृहीतस्य विशेषणैः परिष्कारः॥ ॥ क्रियेति· यथा समासेन क्रियाविशेष्यते· तथा यदि कृ
त्तद्धितादिनिर्विशेष्यते· तदा क्रियापरिकर एव॥ गेहादित्यादि· हे राधे त्वं देवकीनंदनस्य कृष्णस्य दर्शिनेत्रेन निपतितासि त्वं
गेहात् सरितं नदीं याता गतां उदकंहारिका· उदकमाहर्तुं न पुनराजिहीषे· न पुनरागच्छसि· मंस्थामि स्थास्यामीति कृत्वा यमु
नातीरे वीरुधां लतानां गृहाणि श्रयसि· आश्रयसि। गोसंदायी· गवां बन्धनकारिणी सती· गोवर्द्धनाद्रेर्वनान्येव विशसि च। हारि
केति· हृञ् हरणे तुमुनर्थे ण्वुल्। आजिहीषे इति ओहाङ् गतौ· आङ्पूर्वः मध्यमपुरुषैकवचने श्लाविति द्विर्वचने भ्रस्नामित्याका
रस्थितं। मंस्थामीति· मस्जिर्लृटि उत्तमपुरुषे मस्जिरंत्यात् पूर्वमिति नुमि नकारलोपे च रूपं। लताप्रतानिनी वीरुदित्यमरः।
गोसंदायीति· संधाने वेषने· कान्द इति प्रसिद्धं। अत्र ल्युडादिकृता तादर्थ्यपुरस्कारेण क्रियाविशेष्यते· [illegible] एव

स्था

× देवाग्निमप्रत्यय इति क्रियाया विशेषणत्वेन परिकरता ३

मिति यत्र लक्षणहेत्वोः शत्रकुद्विणीत्यनेन लक्षणादिश्चाद्यंते न क्रियाविशेष्यते तत्रापि क्रियापरिकरो द्रष्टव्यः यथा पुष्पात्स्वहृदे
स्थैर्यं गतः फलतस्तु समायात इत्यादि ॥ ॥ सलीलमित्यादि कश्चिन्नायकः प्रियया जघनेन नतु तुदे प्रेरितः । स्तनोपपीडं स्तनाभ्या
मापीड्य । जघनेन कीदृशेन नितंबिना कटितटवता निविडेन च । कांतया कीदृश्या सलीलं सविलासं यथा स्यादेवं पुष्पावतंस
कं समासर्जत्या आरोपयंत्या । कीदृशं आसक्तं संबद्धं लताभूषणं यच्च तत्तु । स्तनोपपीडमिति स्तनाभ्यां चोपपीडेति णमुल् । अत्र णमुलो
ऽध्यायेन लोदान क्रियाया विशेषणं परिकरः । एवमिति तत्र हि यस्माद्धातो व्रीडादिस्तस्मा शय्यंत इत्यादि पथि दृष्टसंकायोपविष्ट
पांथैर्हित शायिकाः निद्रित शयनानीव शय्यंते शयनानि क्रियंते । श्रीकंठगृहेषु धार्मिकजनैः तपस्विभिः आसिका इव उपवे
शनानीव आस्यंते स्थीयंते । यथा उछ्रो यत्र कुर्वीत उपविशति तथा तपस्विभिरुपविश्यत इत्यर्थः । हे सखि तत्र निकुंजशाखि नि
निकुंजवृक्षशून्ये विजने ग्रीष्मस्य मध्याह्ने संज्ञानां खसंज्ञानामपि सारिकाणां प्रियस्याभिसारणव्यापारे रम्यः क्षणो वर्त्तते ।
शय्यंत इति शीङ् स्वप्ने भावे यक् । शायिका इति भावार्थनिर्देशे ण्वुल्वक्तव्य इति शीङ्धातोर्ण्वुल् तथा च शायिका शयनानीत्यर्थ
: । श्रीकंठः शिवः श्रीकंठः शितिकंठः कपालभृदित्यमरः । आस्यंत इति आस उपवेशने भावे यक् । आसिका इति आस उपवे
शने धात्वर्थनिर्देशे ण्वुल्वक्तव्य इति ण्वुल् तेन आसिका आसनानीत्यर्थः । सज्ञः सन्नद्धः संभृत इति विश्व इति मेदिनीकरः । अत्र श
यितापेक्षयोपविष्टस्याभिसरणेवारणीयत्वस्थापनार्थं विवरणे वैपरीत्यमाह अत्रेति अत्र द्वाभ्यां वाक्याभ्यां । सामान्यविशेषा राम
भ्यां शय्यंते आस्यंते इति सामान्यं हेतुः शायिका उपासिकेति विशेषस्ताभ्यामुपरचितमुपस्थापितं रूपं स्वरूपं यस्य सः । भावात्मा ३०

वरूपो धर्मिरूप इति यावत्। प्रत्याय्यते बोध्यते। आख्याताभ्यां आख्यंते शब्द्यंते इत्यत्र। सामान्यरूपेण सामान्याकारेण। एवुलेति।
उष्ट्रासिकाहत शायिकापदाभ्यामित्यर्थः। विशेषेति विशेष्यतयोः कथनादित्यर्थः। नहि नावस्यैकत्वादेकवचनं स्यात् तत्कथं
बहुवचनं शब्द्यंते आख्यंत इति स्यादत आह बहुवचनमिति। विशेषक्रियागतबहुत्वस्यैव सामान्यक्रियायां विवक्षितत्वाद्ब-
हुवचनमित्यर्थः। विवक्षामूले कुत्साप्रतिपादनं कुत्सामेवाह याहीति तथा च तत्तद्विशेषयोगाद्बहुत्वमित्येवाह तान्निरिति।
। उपमानोपमेयसंबंधेन जनितोऽभेदो यस्याः सा। भेदपरिग्रहात् भेदपुरस्कारात्। लकारेण जावप्रत्ययेन। लकारवाच्य
मर्थमाह तेनेति॥ ॥ शतमित्यादि हे प्रियसखि तथापि स दृष्टो मां क्लिश्यन्लक्षणमपि न विरमति न विरक्तो भवति। कीदृशः
परुषैर्निष्ठुरैर्वचनैः शतं वारान् यथा स्यादेवमुक्तः पदे निपतितः स च पार्ष्णिहतिभिः पादतलप्रहारैः सहस्रं वारान्निर्धूतः
चालितः इदृग्विषये मकुटयः पुनः कियत्कृत्वः कियद्वारान् बद्धा इति न वेद्मि। वारानिति कृत्वसुचरणे भावे घञ् तेन वार
पदमाहृत्य वचनं स्वत एव कियत्कृत्व इति। निष्ठुरं परुषं ग्राम्यमित्यमरः। अत्र वारशब्दः कृदंतः कियत्कृत्व इत्यत्र वार
संख्यावाचकतायां कृत्वसुजिति कृदर्थता। कृदंतस्य कृदर्थस्य चा इति रूपेण पौनःपुण्येन माक्रियाविशेषणता। नपुंसकत्वं
कर्मत्वे तुल्यत्वं च तथैकता। क्रियाविशेषणस्यैवं मतं म्रशिनिरादरादिति मतमनुमत्य क्लीबत्वसुश्चासिकादीनां शंकते। न
न्विति। समाव तेत्रिवेति। यत्र धर्मिधर्मिणोरभेदोपचारस्तत्र धर्मोऽजहत्स्वरूप एव धर्मिविशेषकः सोऽयमित्यादौ। विशे
षरूपेण लिंगसंख्यायोरन्वये उष्ट्रासिकादौ कथमन्यलिंगग्रहः। गुणवचनानामाश्रयतो लिंगवचनानीति गुणरूपाणां

विशेषलिंगता। अरुते त्यादि एताम्रुगपंक्तयस्तथा तेन प्रकारेण निविलनेत्रजले मुखे रसकृद्वारं वारं गगनं पश्यंति यथा येन
प्रकारेण न यनजले मत्स्यतरंगाय्येथ्यो निपतति। किं कृत्वा अकृतकवलोद्यमेरास्ये: किमपि वलितग्रीवमुत्तोलितघाटाके यथा
स्यादेवं स्थित्वा। कीदृश्यः नयनमुद्वेगेनेनिश्चले ईक्षणे यासां ताः। अत्र तथेत्यत्र प्रकारवचने थाल् पश्यंतीति क्रियायाँ मनेनानेन क्रिया
विशेषणेन सह विशेषयतीत्यन्वयः। असकृदिति एकस्य सकृच्चेति सुच्प्रत्ययः सकृदादेशः संयोगांतलोपश्चेतेन सकृत् कृत्वस्त्वि
३) ताधिकारीयः पश्चान्नञ्समासः। वलितग्रीवाश्चेति समासः। नाम्नाप्राप्तिपदिकेन। क्त्वाप्रत्ययः कृतः। मुहुरिति वारं वारं स्थित्वेत्य
त्र पूर्वकालिकावस्थान एव वीप्सेति तदर्थे वीप्सा स्यादेवेत्यर्थः। द्वितीय इति यथेत्यत्र थाल् तमेवार्थप्रकाररूपं संदधानं उपस्थाप
यत्र पूर्वक्रियायाः प्रधानक्रियायाः पश्यंतीतिरूपाया विशेषणं भवति तथा च कृत्वस्सुचाप्रत्ययेनोक्तं यत्स्थाने वारं वारादिलक्षणं
तेन यद्यपि तद्धितं उच्यते तद्धितस्य वारं वारार्थता न भवति तदार्थे परिकरभेदः कृत्वं नृ[…]ती नाम निपातरूपः समन्वयरूप इत्यर्थ
:॥ जहजहेत्यादि यथा यथा निशा समाप्यते तथा तथा वेपनशीलतरंगप्रतिमापतितं। किं कर्तव्यविमूढं घूर्णते हृदयमिवोदधेः
शशिविम्बं। इह निशा यथा यथा समाप्यते स्वयं समाप्तिं याति कर्मकर्तरि तङ् तयातथा शशिविंबं घूर्णते। कीदृशं वेपनशीलत
रंगेप्रतिमया पतितं वेन पतितं। किं कर्तव्यमत्रेति विमूढं मुग्धं मुदधेर्हृदयमिव इव शब्द उत्प्रेक्षायां। अत्र तत्र कृद्यत्कृत्यो विप
र्ययो वैपरीत्यं यथा शशिविम्बं घूर्णते तथा निशा समाप्यत इति वक्तव्ये यथोक्तं विपरीतं तद्विशेषणयोगः क्रियाविशेषणं तर राम
योगो वीप्साकारितः॥ धम्मिस्सेत्यादि हे नागीरथि जगीरथावतारिते हे गंगे त्वामहं प्रार्थये। धर्मस्य उत्सवे वैजयंती पताका रू ३१

पदे। भवानीपतेर्मुकुटमालारूपा वेणीप्रवाहो यस्याः तादृशे हे। रत्नाकरस्य समुद्रस्य पत्नि जाधरे· जह्नुमुनिकन्यके हे।
प्रार्थनाविषयमाह मम प्राणाः प्रयास्यंति· गमिष्यंति। कीदृशस्य त्वत्तोयस्यांते समीपस्थिता निषसांगस्य। त्वत्तरंगैः प्रेंखत्तत्त्वलत·
त्वदीयं नाम स्मरतः त्वयि दत्तनेत्रस्य च। वैजयंती पताकायामिति मेदिनिकरः। अंतःशेषन्तिके स्त्रियामिति च। अत्र स्फुटक्रिया
विशेषणत्वं नास्तीत्यत आह तवेति· विशिष्टायाः प्रार्थनकर्मतया विशेषणस्याप्यन्वय इति यथाकथंचिदित्यस्यार्थः।। ।।महा
वाक्यस्थसंबंधिपदे स्वलक्षणादयो यत्र लक्ष्यं तत्सपरिकरएव स्फुटं विष्णोति· लक्षणेति।। महेत्यादि· हे वयस्य· मित्र· त्वं कथय·
सा कान्ता क्व वर्तते। कीदृशी· महान् प्रथिमा स्थूलत्वं यस्य तेन जघनस्थलेन लक्षिता। महाकुंभिकुंभस्थलादप्युच्चौ कुचौ यत्र ते
न हृदयेन लक्षिता। दीर्घे उज्ज्वले निर्मले लोले चपले चक्षुषी यत्र तेन मुखेन लक्षिता च। इह लक्षकपदानां संबंधिनि विशेषणे
: परिष्कारः।। ।। आदिपदग्राह्यं हेत्वादि· तत्र हेतावाह हेत्विति।। त्वयेत्यादि· त्वया जंगेति पवित्राणि· त्वयि जनोक्तयोऽपुण्याः:
अकुशलाः। त्वयातो काजनानाथवत्तः सरलोकाः त्वमनाथाऽसीरणा विपद्यसे· विपन्ना नवसि। अत्र हेतुद्वयपरिष्कारो व्यक्त एव
।। ।। अनेनेत्यादि· हे रंभोरु अनेन तरुणेन स्वरूपेन सहत्वमनसो रुचिरविलासैः कश्चित्कथयतीत्यर्थः। किमर्थं वनपंक्तिषु विह
र्तुं· क्रीडां कर्तुं। कीदृशीषु स्मि· प्रानदीनेदस्ततरंगसंगिवायुना कल्पितासु। कश्चित्कामप्रवेदन इत्यपरः। अत्रानेनेति सहयु
क्तेऽप्रधाने इति तृतीयांतप्रतिपाद्यः सहार्थश्च विशेषणाभ्यां परिष्क्रियते।। ।। इंदीवरेत्यादि· वीप्रुवयोर्योगः संबंधः परस्य
रशोनासंपत्येनवतु। विघ्नमेघयोर्बंधयातयोर्योगः परस्परशोनाथितयेत्यर्थः। अयं नृपो नीलनलिनश्यामांगः त्वं च गोरो

चनावक्रौ गंगयष्टिः। अत्र परिहरद्भय इति तादर्थ्ये चतुर्थी। तत्तादर्थ्यायेपरिष्कारः॥ ॥ प्रत्यक्षेत्यादि। तुभ्यं नमः। कीदृशाय प्रत्यक्षो
वस्तूनां पदार्थानां विषयो रूपादिकं यस्य तस्मै। यद्वा प्रत्यक्षो वस्तु विषयो पदार्थो घटपटादीयस्य तस्मै। पदार्थ इह स्वर्गापूर्वदेवता
दिः। रूपादेर्विषयः प्रमानिति मदिनिकरः। जगतां हिताय उपकाराय। विश्वस्य भुवनस्य स्थितिरवस्थानं प्रलयो नाशः संभव उ
त्पत्तिस्तेषां हेतवे। सर्वं वस्तु आत्मा स्वं यस्य तस्मै सर्वरूपायेत्यर्थः। विजितो रोषकामो येन तस्मै। त्रिभुवनस्य प्रभवे ईश्वराय शि
वाय कल्याणकारकाय च। अत्र नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्चेति तुभ्यमिति नमोयोगे उपपदविभक्तिश्चतुर्थी तदर्थे
३४ इतरपदार्थैः परिष्क्रियते॥ ॥ उपमेति उपमादीनां शब्दार्थानां नयनेंगितिर्यत्र साधर्म्यात्पादनेः सपरिकरः। शब्दार्थयोर्नयं
चतेषां नेंगितिर्नज्ञनैः॥ वाह इत्यादि कथं कथमपि रचयति पदं मार्गं प्रलोकते छेद्यमाविसइ छेद्यमाविशति। चौर इव
कविरर्थं लब्धुं दुःखेन निर्वहति। इह कविरर्थं वाञ्छन् लब्धुं प्राप्तुं दुःखेन निर्वहति समर्थो भवतीत्यर्थः। चौरसाम्यमाह कथं क
यमपि कष्टस्थापदं विरचय्य रचयति कुत्र कुत्रापि वा पदं रचयति। मार्गं कविवर्त्म प्रलोकते पश्यति अनेन पथा कविभि
ःकिं गतमित्यनुसंदधातीत्यर्थः। छेद्यं छेदनीयमश्माद्याविशति। चौर इव यदा चौरः क्वापि कथमपि वा पदे न्यवसायं पादे
वा रचयति मार्गं गतागतवर्त्म पश्यति छेद्यं छेदार्हस्थाने प्रविशति अर्थं साधु धनं प्राप्तुं दुःखेन शक्नोति तथेत्यर्थः। अत्र सा राम
न्यायादकविशेषणे रूपमाऽसिद्धापि साधिता॥ ॥ विश्रले इत्यादि। विकटे गगनसमुद्रे दिवसे सूर्येण मंदरेणेव महितेन ३२
यिते च। निर्गच्छति मदिरेव संध्या तस्या मार्गेणाष्टतकलश इव शशी। इह संध्या निर्गच्छति। विकटे महति गगनसमुद्रे मंद

रजनिरिणेव रविणा दिवसे महिते ऽजिते ऽयच मथिते सति मदिरेव यथा मंदरमथिते समुद्रे मदिरा निर्गच्छति तथेत्यर्थः।
तस्याः संध्याया मार्गेण पथा चंद्रो ऽमृतकलश इवास्ति निर्गच्छति वा। आकांक्षाक्रमेण निर्गच्छतीति न यान्वयी। अत्र सूर्यादिनि
र्देशैरन्योन्योपमानात् साधर्म्योपपत्तिरित्यार्थीयं ॥ ॥ रहश्च इत्यादि रचितमृणालाभरणो नलिनीदलास्थगितपीवरस्त
नकलशः वहति प्रियसंगमेपि मदनाकल्पकप्रसाधनं युवतिजनः। रह युवतिजनः पतिसंगमेपि मदनस्याकल्पकप्र
त्कंठां तदर्थं प्रसाधनमलंकारं वहति। कीदृशः कृतमृणालालंकारः। पद्मिनीपत्रैरस्थगित उत्तंभित आवृत इति याव
त् पीवरं कुचघटो येन सः। अस्थगित इति उत्पूर्वात् स्थगि संवरणे कर्मणि क्तः। आकल्पकस्तमोमोहग्रस्ताबुत्कलिकामुद्रो
ऽर्तिमिदिनिकरः। यद्वा मदनस्य रतिपतेरकल्पकमंजनकं प्रसाधनमित्यर्थः। अत्र प्रियसंगमे कामजनकमेव प्रसाधनं
ञा युक्तमिह तु तद्वैपरीत्येन विरुद्धता। जलक्रीडायां तु मृणालनलिनीभ्यां युवतेरुपस्कारः शाब्द आर्थश्च व्यक्त एव ॥ ॥ पूर्वं प्रति
यत्रोत्तरस्य वस्तुनो वीप्सया विशेषणत्वेन स्थापनं निषेधो वा सैकावली इयमपि परिकरादभिन्नैवेत्याह। एकावलीति एके
नापरस्य परिष्करणमेकावल्यामपि लभ्यत इत्यनयोरभेद इत्यर्थः॥ पर्वतेत्यादि इयं पयोष्णी नदी नेद्रः पयो जलं वहति। तत्प
श्यतावाक्यार्थस्यैव वाकर्मता। पयः कीदृशं पर्वतस्याद्रेर्भेदनशीलं। अद्रिभित्त्वा वहनात्। पवित्रं पुण्यहेतुकं। नरकस्यानिरय
स्य जेतृ विजेतृ अत एव वक्रमतं अनेकसंमतं गहनमगाधं। हरिरिंद्रस्तमिव। इंद्रं कीदृशं अद्रिपक्षस्य छेदत्वेन पर्वतभेदी

॥ सर्वादो भवति। विभाषा सुपो बहुच् पुरस्तादिति सूत्रेण ॥

पविना वज्रेण त्रायते अन्यत्रापि दृश्यत इति त्रः पवित्रः पश्चात्कर्मधारयः। यद्वा पर्वतभेदिना पविना त्रायते इति पर्वतभेदि
पवित्रः तौ हे नरः नल इति संबोधनं रलयोरेकत्वस्मरणात्। कस्य वङ्कमतमीषन्मतं जैत्रं किंतु सर्वस्यैव संपूर्णमेव स्वीकृतं।
वङ्कमतमितीषदसमाप्तौ वङ्कच्॥ गहनं कठोरं। हरिः सिंहः तमिव पर्वतस्य भिद्यत इति भेदो विवरं गुहेति यावत्। तत्संवङ्केत
कायित्वात् पवित्रं श्वेतं नरकस्य ब्रह्मास्तपुंसोपि जेतारं। वङ्कु वङ्कमानविषयो मतं गोष्ठनिभेदोपयपं ते वङ्कमतं गाहस्तिनः ते
षांपित्वेन तस्य पूज्यत्वात् तारं हंति तं। हरिर्विष्णुस्तमिव। पर्वतस्य गोवर्द्धनस्य भेदकं उत्थापकत्वात् पवेर्वज्रात् त्राणं
३३ यस्मात् तं विष्णुस्मरणस्य तदपि फलं। नरकस्य दैत्यभेदस्य जैत्रं वङ्कमतं गात्र हिंस्रान् हंतीति यः तं। हरिर्वायुस्तमिव सोपि ति
वेगित्वाद् द्रुमभेदी पवित्रः पवनत्वात्। अत एव नरकस्य कश्मलस्य निवारकः वाङ्मनोवातयोगिनां स्वीकृतः गहनः कष्टेन
परिचेयश्च भवति। इंद्रे सिंहे निले विष्णौ हरिः शमनस्त्र्यर्ययोरिति शाश्वतः। अत्र हरिमिवेत्यादि शब्दरूपैकावल्या विशेषण
त्वेन पयोरूपस्य कर्मकारकस्य परिष्कारः॥ ॥ किमित्यादि हे शशिमुखि सखीहस्तारोपितोऽयमयमयं विलासार्थं परिकू
दस्तवासंस्मरणे न किंचित् श्लाघ्यति। तदाह कवरीकेशवेशः किमिति याह क्लृ ताह क्लृ न रम्य इत्यर्थः। हशीने चे अकज्जले किं
कपोलयोः पत्रावल्योऽद्याधुना किं नैव लिखिताः। कवरीकेशवेशः स्यादित्यमरः। खलु शब्दोऽवधारणे वाक्यभूषायां वा। अ
त्रायमिति सर्वनामोपस्थापितयाऽर्थैकावल्या तुल्ययैव परिच्छेदरूपस्य कर्तृकारकस्य परिष्कारः॥ ॥ अंबेत्यादि अम्बा माता राम
नमया तुष्यति तुष्टा भवति न खलु पयः पुत्र वधात् तुष्यति। सापि स्नुषा नाम्ना यान मया च तुष्यति अहमपि नतया स्नयानतया स्नु ३३

षयानुष्यामि· हे राजन् कस्य दोषाय मिति वद। वदेत्यत्र वाक्यार्थस्यैव कर्मता। अम्बामाता मात्रिकापि चेति रत्नकोषः। समाः स्नुषा
जनीवध्वइत्यमरः। अत्राम्बाद्यर्थे स्तद्वाचकशब्दैश्च मयेत्यादेः परिष्कारः॥१२॥ दीपकं लुब्धपतिक्रियेत्यादि· एकत्रस्थितेन जात्यादि
वाचिना पदेन यद्विसर्ववाक्योपकारः क्रियते तदा दीपकं। दीपयतीति दीपकमित्यन्वर्थनाम। अष्टधा तदित्याह अर्थेति। तस्य
दीपकस्य भिदाः भेदाः॥ चरंतीत्यादि· तव दंतिनो हस्तिनश्चतुःसमुद्रकूलवनेषु चरंति· कुंदपुष्पदीप्तयो निर्मलास्तव गुणाश्च
चक्रवालस्य लोकालोकस्याद्रेः कुंजेषु चरंति गच्छंति॥ अत्र क्रियावाचिना चरंतीतिपदेनादिस्थेन वाक्यद्वयं दीपितं॥ मध्यस्थितेनां
तंस्थितेन वा क्रियापदेन यत्र वाक्यदीपनं तदपि मध्यदीपकमंतदीपकं चेति मंतव्यमित्याह एवमिति॥ ॥पवनइत्यादि· दक्षिणः
पवनो मलयानिलो वांलतानां जीर्णपक्वं पर्णपत्रं हरति। स एव पवनो नागरीणां मानभंगाय कल्पते· शक्तो भवति। अत्र पवनप
दस्य सामान्यत एवोभयत्रान्वयाज्जातिवाचकत्वमादिस्थत्वं च। एवं चेत्य र्थे समुदायोऽस्त्वंतमनेदमाह। मध्यांतस्थयोरपि जा
तिवाचिनोर्दीपकं तत्तन्नाम्नाज्ञेयमित्याह· एवमिति॥ ॥श्यामलाइत्यादि· प्रावृषार्णर्निर्विवर्षजाताताभिर्जीमूतपंक्तिभिर्मेघसंघै
र्दिशः श्यामलाः श्यामाः। रथ्याभिर्भूतनत्टणपंक्तिभिर्भुवश्च श्यामलाः संति। कालश्यामलमेचकाइत्यमरः। अत्र जातिइत्यर्थे
प्रावृष एण्य इत्येण्यप्रत्ययः। घनजीमूतमुदिरेत्यमरः। शाद्वलः शादहरितइति च। शादः स्यात्कर्दमे शष्पेइति मेदिनिक
रः। अत्र श्यामलपदेन गुणवाचिना आदिस्थेन दीपनं। मध्यांतस्थयोरपि गुणवाचिनोरेवं ज्ञेयमित्याह· एवमिति॥ ॥विष्णुने साम
त्यादि· दानवानां दनोरपत्यानामसुराणां विभूतयः संपत्तयो विक्रांतेन विष्णुना क्वापि नीताः प्रापिताः तेनैव देवतानां हृदयः श्रि १०

यः कृतो यथावधि दृश्यतादानीता आसन् स्थिताः । संयत्तानुपचये ऽद्रिरिति नानार्थः । अत्र विष्णुशब्दो ऽव्ययपर आदिरूपश्च । मध्यान
स्तयोरपि द्रव्यवाचिनोरेवं ऽदृश्यमित्याह एवमिति ॥ ॥ हृष्यतीत्यादि कामी इह मधौ वसंते तेषु हृष्यति हृष्टो भवति वकुलेषु
तुष्यति मरुति वाति मोदते । कलरवेषु कोकिलेषु च प्रीयते प्रीतो भवति । सर्वत्र चिरमित्यन्वयः । हिरवधारणे । प्रीयत इति प्री
ङ् प्रीतौ दैवादिकः । अत्र हृष्यतीत्यादिपदैरावर्त्तमानोऽर्थः सर्ववाक्यदीपकः ॥ ॥ उत्कंठयतीत्यादि मेघानां पंक्तिर्मयूराणां हृदं
तम्नृहमुत्कंठयति उज्जीवयति अद्य इदानीं कामश्च यूनां चित्तमुत्कंठयति उत्सुकयति । अत्र उत्कंठयतीति पदमावर्त्तमानं
३५ वाक्यद्वयदीपकं ॥ ॥ जयेत्यादि हे देव महादेव भुवनस्य जगतो भावनजनक जय । हे भगवन् अखिलेषु जनेषु वरप्रद । निगम
स्य वेदस्य निधे आश्रय जय । रम्य चंद्रचूड जय । मदननाशक जय । प्रथमगुरो जय । निगमो नगरे वेदे इति मेदिनिकरः । अ
त्र जयशब्दस्तदर्थश्चावर्त्तमानः सर्ववाक्यदीपकः ॥ ॥ त्वमित्यादि परिणताः परिणामिनो ऽकोदयस्त्वयि त्वद्विषये एवं परि
च्छिन्नां गिरं वाणीं बिभ्रति धारयंति । इह जगति यत्तत्त्वं वस्तु त्वं न भवसि तत्तत्त्वं वयं पुनर्न विद्मो जानीमः सर्वात्मकत्वाद्भव
स्य । परिच्छिन्नां वाणीमाह त्वमादित्यस्त्वं चंद्रस्त्वं वायुस्त्वमग्निस्त्वं जलं त्वमाकाशं उ दे त्वं भूमिस्त्वमात्मा चासीति । उसं बोधन
शब्दोक्त्योरिति मेदिनिकरः । अत्र प्रथमार्द्धे त्वमिति शब्दार्थयोरावृत्तिरसीति क्रियया दीपिता तृतीयपादे त्वयीति रूपांतरेण राम
विषयत्वेन युष्मदर्थस्त्वमित्येवं रूपो धारणक्रियान्वयी अंत्यपादे ऽपि त्वमित्येव भवनान्वयीत्यावृत्ती नामावृत्तिरावलीति ॥ ॥ ३९
एवेत्यादि नवपल्लवेषु लोलति घूर्णते विटपेषु चलति शिखरेषु स्थापयति स्तवकेषु चरणौ वसंते लक्ष्मी रश्लोकस्य । इंद्रा

शोकस्य नवपल्लवेषु वसंतलक्ष्मीर्लोलति लुठति। तस्य विटपेषु शाखासु घूर्णते तस्य शिखरेष्वग्रेषु चलति गच्छति। तस्य स्तव
केषु पुष्पगुच्छेषु चरणौ स्थापयति। लोलतीति लोल चलने तौदादिकः यद्वा लोलतीति क्विवंतात्तिप्। अत्र पदद्वयं द्वयवाच
कं संपुटक्रमेण मिथः संबध्यमानं मिथः संबद्धान्येव पदानि दीपयतीति संपुटं॥ ॥सलिलमित्यादि जले प्रफुल्लपद्मं पद्मा
नि सुगंधमधुना समृद्धानि। लीनं यदलिकुलं तेनाकुलं मधु भ्रमरकुलमपीह वसंते मधुरणितं मधुना पुष्परसेन शाहृतं
मधौ मधूकद्रुमे वा शाहितं। मधु पुष्परसे नातु मधुद्रुमे इति मेदिनिकरः। अत्र संपुटघटिकाक्रमेण संग्रथितानि सलिलादि
पदान्यंतस्थिताधिकरणरूपद्रव्यवाचकेनेहेति पदेन दीप्यंते॥ ॥शोभितेत्यादि अनया शारदा शशी शशिनापि निशानि
शया कुमुदवनं। कुमुदवनेन च पुलिनं पुलिनेन च शोभते हंसकुलं। इह सर्वत्र शोभत इति क्रियान्वयः। अत्रान्योन्यग्र
थनया मालाक्रमस्तेन च प्रधानक्रियायां दीपनं। परस्परग्रथनयारसनामालयोर्भेदं पृच्छति काइति। उत्तरं पूर्वत्रेति। र
सनायां सर्वत्र वृत्त्याछंदसा छिन्नं भिन्नीभूतं पदं पदेन युज्यते मालायां तु उत्थिकमेव पदं पदेन युज्यत इत्यनयोर्भेद इत्य
र्थः॥ ॥संगममित्यादि विवृतोयं विस्तारगुणे। अत्र भावः क्रिया सा च सामान्यलक्षणेन ज्ञाता विशेषमाक्षिपति ज्ञात
सामान्यस्य विशेषजिज्ञासोदयात्। तत्र च समारोपणरूपे कारकजिज्ञासायां सामान्यत एव वीप्सया निधानं। येन ति
यद्विति वा। विस्तरवत्वेन चक्रवालादिसाम्यमस्य॥१८॥ कमललक्षणमाह शब्दस्येति शब्दार्थयोः प्रतिपाद्यानपणं क्रमः। शब्द त
दर्थतद्गुणयनेदात् त्रिधेति विभागः॥ तस्या इत्यादि तस्या आलापस्मितहसितवचने सुधासालोकने वल्लकीकुहूप्रागदीव

रसंपदो वीणाकुंदमालानीलाब्जसंपन्नयोर्लीयंते। कीदृशीभिः उपचितविलासाभिः। अत्र शब्दस्य पदरूपस्य परिपाट्यागणन
मितिपदघटितः शब्दक्रमः॥ ॥ इंदुरित्यादि· विवृतोयं सस्मितत्वगुणे। अत्र वाक्यार्थाभिधायको शब्दसमुदायो तादृशाभ्यां श
ब्दसमुदायाभ्यां संबद्धाविति वाक्यघटितः शब्दक्रमः॥ ॥ हस्तेइत्यादि· यत्र सुपर्वावधूनां हस्ते लीलाकमले· अलकं चूर्णकुंतले·
वालकुन्देनानुविद्धं संवद्धं। लोध्रप्रसवस्य रजसा लोध्रपुष्पस्य धूल्या मुखश्रीः पांडुतां श्वेततां नीता। चूडापाशे प्रशस्तशिखा
यां नूतनकुरवकपुष्पं चारु मनोज्ञं· शिरीषपुष्पं कर्णे· सीमंते· नीपं कदंबपुष्पं। त्वदुपगमस्त्वदीयागमने तस्माज्जातं। इदं सर्वे
पुष्पविशेषणं। चूडाशिखायां वाऽभूषणे इति मेदिनिकरः। शिखापरस्यापि पाशपदस्य केशपरत्वमेव। अत्र शरदादिका
लक्रमेणार्थानां क्रमादार्थः क्रमः॥ ॥ पायादित्यादि· स देवो वो युष्मान् पायाद्रक्षतु। कीदृशः रचिता त्रिविक्रमस्य वामन
स्य तनुः शरीरं येन सः। दैत्यनाशकश्च। यस्याकस्माद्वर्द्धमानशरीरस्य सूर्यमंडलं मौलौ रत्नरुचिर्जातं· क्रमात् श्रुतौ कर्णे शो
नमानतालंककांतिर्जातं· वक्षसि कौस्तुभदीप्तिर्जातं· उदरे नाभीपद्मोपमं जातं। कौस्तुभो मणिरित्यमरः। इह हरेर्नाभीप
द्मस्य श्वेततया रूपेण नसाम्यं· किंलाकारादिने त्यवधेयं। वैकुंठो विष्टरश्रवा इत्यमरः। अत्र मौलिप्रभृतिदेशपुरस्कारेणार्थक्र
मः॥ ॥ पंकइत्यादि· पंकजानि पंके न्यस्तानि· कुवलयानि क्षिप्तानि क्रुद्धे· हतौ विघ्नं विनिकीर्णं निरस्तं श्वेड्रोनतसि। कारनयना राम
धरवदनैस्तस्यां लीलावत्यां निजसृष्टिरचनात्स्पष्टैव प्रजापतिना। इह प्रजापतिना ब्रह्मणा तस्यां लीलावत्यां नायिकायां हस्त ३५
नेत्राधरमुखैर्निजसृष्टिरणुत्सृष्टैव दत्तेव· पंकजादीनामपासनात्। तदेवाह· पद्मानि पंके कर्दमे न्यस्तानि· नीलाब्जानि क्रुद्धेऽ

गंगि॰

गाधजलेक्षिप्तानि। इत्तीवेष्टनेविन्नफलंन्यस्तंचंडोगगनेक्षिप्तइति। स्रष्टाप्रजापतिर्वेधाइत्यमरः। अत्रपंकजादीनांकरादिनाज
येशाब्दक्रमः प्रधानीभूतोधिकरणानामुपर्युपरिभावः क्रियाणांचत्यागतारतम्यमित्यार्थक्रमश्चन्यग्भूतोऽप्रधानइत्युभयक्रमेपि
शाब्दप्रधानता॥ ॥गंगेइत्यादि· हेगंगेदेविहस्तमांपुनीहि। मातर्यमुनेपुनर्दर्शनमस्तु। हेपितःप्रयाग·भवान्स्तात्प्रश्नोस्तांसुसं
वादोस्तुहेनगवन्न्यग्रोध· अक्षयवट·मांध्यास्मृति·स्मरिष्यसि। तमवंतिनगरीनाथमुज्जयिनीपतिं·भोजराजंनृपं·वयंदिदृ[illegible]म
हेऽद्रष्टुमिच्छामः। कीदृशं·हारस्वकुलताकर्णालंकारैर्विपुलाः पीनवाहूलयुक्तवक्षोभुजायस्य तं। भवतामेवप्रुंभावप्रुक
पररूपं। स्वाप्रश्नइति· स्वप्नु आसमंतातप्रश्नःसंवादः यथा आपृच्छस्वेत्यत्र। वतंसेनकर्णालंकारेणविपुलः स्थूलश्चांसोबाहुमू
लंयत्र·वक्षसितत्र। वतंसः कर्णपूरेस्यादितिविश्वः। अत्रादरवतावचनरचनेनाभ्यर्थप्रार्थनार्थपरिपाटिकृतातस्यांचगंग
याद्दारस्यंयमुनयामिलतायाः प्रयागेणवतंसविपुलस्थूलांसवक्षसः न्यग्रोधेनभुजस्यशाब्देनक्रमेणमिथउपमानोपमेयभावो
व्यक्तइत्युभयक्रमेऽर्थप्रधानता॥१९॥ पर्यायंलक्षयति मिषमिति· यन्मिषं·योक्तिर्भंगि·येश्चावसरःसपर्यायः मिषाद्यतमए
वपर्यायइतिलक्षणं॥ मयेत्यादि· कयाचिन्नायिकयाएवमनेनप्रकारेणमिषतोव्याजाद्धितिर्धियेवहिर्भूतं। तदेवाह· मयात्य
क्तावल्लकीवीणावहिरेवगच्छेत·अवश्यायकणैर्हिमलवैःसाइतांचप्रजेत· ततएनांश्रीप्रनिचोलकेवस्त्रेऽहंकरवै·करि
ष्यामि। अवश्यायस्तुनीहारइत्यमरः। निचोलःप्रच्छदपट इतिच। उदकेगतरकालस्फुटित्तदभिधानंमिषपर्यायः॥
॥दृशातीत्यादि· असौपरभृतःपिकः सहकारस्यमंजरींदशति· तमहंवारयिष्यामि· ततोपावाप्यांस्वैरंस्वच्छंदमास्यतां· उ

36

पविश्यतां। स्वच्छंदमंदयोः स्वैरमिति विश्वः। अत्रोदर्कानिधानात् रसाकांक्षत्वं॥ ॥राजन्नित्यादि॰ हे नाथ॰ प्रनोत वाग्निनवनेश
श्रुगृहेद्य त्वमनेनाकारणे वेश्मवलभीषु गृहोपरिकुटीषु चित्रलिखिताने तान्विलोकय घत्येकं शुक आनायते वदति। कीदृशः
अर्थवेगैः पथिकैः पंजरात्सुक्तः त्यक्तः। आनायणस्वरूपमाह॰ हे राजन्॰ राजसुताकुमारिकामां न पाठयति। देवो महादेवोपि
तत्स्लीस्थिताः कृतमौनाः। हे कुत्र मां नोनय। हे कुमार॰ राजबालक तव कुशलं॰ हे अन्यं केगणिके ऽद्य मयान पठ्यते। देवीकृ
तानिपिकायामित्यमरः। वाक्कृल्येनकुट्टायाः शुकनोजनं च प्रगृहेकर्म। युवराजस्तु कुमार इत्यमरः। नाड्यो केगणिका न्कृ
केति च। अत्रस्वतापवर्गानि पूर्णवाक्यतयानिराकांक्षत्वमुक्तौ गुनेगिर्थ्येवैव॥ ॥शांत्येइत्यादि॰ जगतां प्रभुर्ईश्वरस्य कपालद
म॰ललाटमाला वो युष्माकं शांत्यै॰ शमायास्तु। पंचवक्त्रतया कपालानां माला। यदीयां लिपिं यत्सं वन्धिनी मस्तराली गणानं ब्रह्मा
दयः क्वापि क्वापि पदशः पदक्रमेण पठंति वाचयंति। कीदृशीं नाति प्रसिद्धवर्णां। अतएव क्वाचित्कः पाठः। पाठविषयमाह॰
अयं शिवो विश्वं जगत् स्रक्ष्यति॰ निर्मास्यति। क्षितिं भूमिं वक्ष्यति॰ ध रयिष्यति। अपामीशिष्यते। जले ऐश्वर्य्यं लप्स्यति। नागैः सर्पै
रशिष्यते॰ नोक्ष्यते ऽयं रागिषु विषयासक्तेषु यं रंस्यते॰ क्रीडिष्यति। जगदयमत्स्यति॰ नक्षिष्यति॰ द्यां स्वर्गमयं निर्वेक्ष्यति॰ उपनो
क्ष्यतीति। स्रक्ष्यतीति॰ सृजविसर्गे लृट्॰ सृजदृशोर्झल्यमकितीत्यम्। वक्ष्यतीति वहप्रापणे लृट्॰ षढोः कःसीति कत्वं। ईशिष्यत राम
इति॰ ईश ऐश्वर्ये लृट्। अशिष्यत इति॰ अश भोजने॰ लृटि कर्मणि। रंस्यत इति॰ रमु क्रीडायां लृट्। अत्स्यतीति॰ अद भक्षणे लृ ३६
ट्। निर्वेक्ष्यतीति॰ निपूर्वात् विश उपवेशने लृट्। अस्तु मयेवि नाशे। ब्रह्मणा करणेन ईदृशी आकांक्षा। चतुर्णां युगानामेक सहस्रेण ब्रह्म
सं

णएकंदिनं। अनेनैव क्रमेणाहोरात्रादिकं। इदृशी आकांक्षा। अतसंख्यब्रह्मापवर्गानंतरमेकंदिनं वैष्णवं अनेनैव क्रमेणाहोरात्रादि
कं। पुरुषायुषेति। अचतुरादौ निपातितं। अपामीशिष्यत इत्यादौ वरुणादयो ज्ञेयाः। अत्र ब्रह्मादीनां साक्षादभिधानाभावात् साकां
क्षता॥ ॥अथेत्यादि। अनंतरं मधुर्वसंतोऽथ आत्मानमदर्शयत् दर्शितवान्। किंकर्तुं आतुरां विक्लवां रतिं कामवधूं अभ्युप
पत्तुं बोधयितुं। कीदृशः तैः परिदेविताक्षरैः विलापाक्षरैः दिग्धशरैः विषाक्तशरैः इवाहितः पीडितः। विलापः परिदेवनमित्य
मरः। दिग्धो विषाक्तबाणे स्यात् पुंसि लिप्तेऽन्यलिंगक इति मेदिनिकारः। नानार्थत्वादेव नियमार्थं शरपदमिह। अत्र वसंतावि र्भा
वप्रस्तावो निरपेक्ष एवेति निराकांक्षत्वं॥ ॥अद्यापि इत्यादि। अद्यापि बालो दामोदर इति जल्पिते यशोदया। कृष्णमुखप्रेषित
दं निभृतं हसितं व्रजवध्वा। यशोदया कृष्णबाल्य उक्ताविति व्रजवधूस्मेरं दृष्ट्वा काचित् कस्यैचित् कथयति। अद्यापीति। यशो
दया अद्यापि दामोदरो बाल एवेत्युक्ते कयाचिद्गोपवध्वा कृष्णमुखप्रेषितं न्यस्तमक्षियत्र हसिते एवं निभृतमेकांते हसितं। रहो र
हस्यं एकांतचेष्टा। मतल्लिका प्रशस्ता। मतल्लिका प्रशस्तवाचकान्यमूनीत्यमरः। निधुवनं सुरतं। निधुवनमायोजनमाकूरथे
विद इति हारावली। अत्रानेकेनार्थं जाते न साकांक्षताव्यक्तैव॥२॥ अतिशयलक्षणमाह। विवक्षेति। विशेषस्य प्रकर्षस्य लोक
सीमातिवर्तिनी लोकमर्यादातिशयिता या विवक्षा वक्तुमिच्छा साऽतिशयोक्तिः केवलस्याखंडशाया जातेश्चातिशयाभावाद्गुणक्रि
ययोरेवातिशय इत्याह संभवेति। उपकल्प्यते समर्थ्यते॥ अलमिति। न केवलं प्रभावादीनामेवातिशयोक्तिरपि तु अलंकारांतराणा
मपीमामतिशयाभिधानात्तिमेकं परायणमाश्रयं वदंति। कीदृशीं वागीशेन वाक्पतिना महितां पूजितां। परायणमाश्रये

इति विश्वः ॥ अहो इत्यादि हे नृपाल यस्माद्वयस्तुवनचितयोदरे मातुं परिच्छेत्तुमशक्योपि तव यशोराशिर्मातिसंमाति तस्मा
त्त्रिभुवनचितयोदरं विशालमत्राहो आश्चर्यं । अत्र यशोराशिपस्य गुणस्यातिशयेन महत्वातिशयः स्फुट एव ॥ ॥ स्तनयोरित्यादि ।
हे प्रिये तव स्तनयोर्जघनस्यापि मध्येऽन्तराले मध्यमवलग्नमतिकृशत्वादस्ति नास्तीति संदेहो ममाद्यापि न निवर्तते । अत्र तान
वस्य तनुत्वस्यातिशयः । लोकेति नहि लोकः पयोधरजरस्थित्यन्यथानुपपत्त्यापि मध्यं निश्चिनोतीत्यर्थः ॥ ॥ मल्लिकेत्यादि इदृश्यो
ऽभिसारिका ज्योत्स्नायां चंद्रकिरणेपि न लक्ष्यंते न ज्ञायेते केनापि । कीदृश्यः मल्लिका मालती तस्या मालां बिभ्रति । मलयपीके ष्टका
नां नारत्नलहितेघिति ....क्रत्वः । सर्वांगीणं सर्वांगव्यापकमार्द्रं चंदनं यासां ताः । क्षौमवत्योडुकूलयुक्ताश्च । क्षौमदूति दुकुलशद्दे
मनिवत्नुमा पत्रादित्वात् स्वार्थेऽण्प्रत्ययः । अत एवकुसुमवत् इत्यपि पाठः । अत्र चंद्रकांतेरतिशयः स्फुट एव । अभिसारोऽभियो
गस्यादिति मेदिनिकरः । लोकसीमातिक्रमश्च न हि शुक्लाम्बरा ज्योत्स्नायामभिसारिका न लक्ष्यं तद्इति लोकसीमेत्यर्थः ॥ उत्क
र्षरूपस्यार्थस्योनयत्र विदलणात्पिहितकोत्यतिशययोरभेदः । कोमितिपृच्छति अथेति । उत्तरं पिहितइति चंद्रातपोत्कर्षस्य
तौल्येपिपिहिते तेनाभिसारिकातिरस्कारइदृनु तस्यास्तिरस्कारेण चंद्रातपोत्कर्षइति प्रकाराभ्यां तयोर्भेद इत्याशयः ॥ ॥ तमि
त्यादि तद्दयितानिज्ञाने यस्मिन्नपांगे राघवेण न निमितं । सीता परिस्पृष्टेनेव ऋढस्तेनापि निरंतरं रोमांचः । इह तत्दयिताया वल्ल
भायाः सीताया अभिज्ञानं चिह्नं मणिरूपं यस्मिन्नपांगे रामेण न निमितं न निहितं तेनापांगेन सीतया परिसर्वतो नाविनस्पृष्टेने रामे
व निरंतरं यथा नवत्येवं रोमांचो ऋढोधृतः । अभिज्ञानं न वेचिह्नेइत्यिशाश्वतः । अत्र रोमांचहेतुक्रियातिशयेन प्रज्ञावातिशय ३७

एवविवक्षितः॥ ॥विमलितेत्यादि· विमर्द्दितरसातलेनापि विषधरपतिनाऽदृष्टमूलछेदं। अप्राप्ततुंगशिखरं त्रिभुवनह
रणपरिवर्द्धितेनापि हरिणा। इह सुवेलं कीदृशं· विषधरपतिनाशेषेणादृष्टो मूलस्य छेदः शेषो यस्य· तं। कीदृशेन· विमर्द्दितं वि
मलितं निर्म्मलीकृतं वा रसातलं येन तेन। पुनः कीदृशं· हरिणा त्रिविक्रमिणाऽप्राप्ततुंगशिखरं। कीदृशेन· त्रिभुवनहरणा
य सर्वत्तो नावाद्वर्द्धितेन· वृद्धिं गतेन। महत्ता· मर्द्दयता। अत्र पर्वतानुन्नावातिशयविवक्षयाऽतिशयः स चैते रत्नभूयमान ए
व॥ रणेत्यादि· रणदुर्ज्जयो दशमुखः सुराअवध्या अहो त्रिभुवनस्यासौ। पतति अनर्थ इति स्फुटं विभीषणेन स्फुटिताधरं नि
:श्वसितं। इह स्फुटिताधरं व्यक्तीकृताधरं यथास्यादेवं विभीषणेन रावणभ्रात्रा निःश्वसितं· निःश्वासस्त्यक्तः स्फुटं व्यक्तमि
वा कुतः दशास्योरणेदुर्ज्जयः सुरादेवा अमरत्वादवध्याः अहो आश्चर्यमसौ त्रिभुवनस्यानर्थः पततीति। इति हेतौ। अत्र
दशास्यसुरयोरन्योन्यक्रियातिशयोक्तेरन्योन्यातिशयः। सकलभुवनक्षयकारितयालोकसीमातिपातः॥ २१॥ श्लेषं ल
क्षयति· श्लेष इति· एकेन पदेन विनक्त्यंतेनानेकेषामर्थानां कथनं यत्र स श्लेषः कथ्यते· एकरूपान्वितमनेकार्थं वचः श्ले
ष इति लक्षणं। स च षड्विधः पदादिभिः स्यात्॥ दोषेत्यादि· प्रकृष्टो दोषो दूषणं यस्य सुदुर्जनो मां किन्न बाधते· किंतु बाधत
एव। मां कीदृशं· अप्रियं तस्य द्वेष्यं। कीदृशः· इत्थमनुभूयमानेन प्रकारेण राज्ञा भूपेन सहसं वध्नन् युंजन् आत्मानमित्य
र्थार्थं। अत्र कर्मवशाबीन कृतः संवध्यमान इत्यर्थत्वात्। राज्ञा कीदृशेन दोषाणां दूषणानामाकरेण स्थानेन। क्षत्रपथः
क्षत्रियमार्गस्तत्र वर्त्तितुं शीलं यस्य तेन पश्चान्नकारसंबंधः क्षत्रियधर्मशून्येनेत्यर्थः। पक्षे प्रदोषो रजनीमुखं मामप्रियं प्र
हा२

३८

यारहितं किन्न बाध्यते । किंतु बाध्यत एव । कीदृशः राज्ञा चंद्रेणोल्लंसं वध्यमानः कीदृशेन दोषाकरेण रात्रिकरेण नक्षत्रपथं व्यो
म तदवस्थितिशीलेन च । अत्र राजपदमभिन्नं शेषपदानां भेदाद्भिन्नपदश्लेषः ॥ ॥ असावित्यादि । असौ राजा नृपो मृदुभिर
पीडाकरैः करैः राजग्राह्यैर्लोकस्य हृदयं हरति । कीदृशः उदयं वृद्धिमारूढः प्राप्तः कांतिमान् शोभायुक्तः । रक्तमनुरक्तं
मंडलं देशो यस्य सः । पक्षे असौ राजा चंद्रः करैः किरणैर्मृदुभिः शीतलैर्जनस्य हृदयं हरति गृह्णाति । कीदृशः उदयमुद
याद्रिमुपगतः । कांतिमान् दीप्तियुक्तः रक्तमंडलो लोहितबिम्बश्च । उदयो वृद्धावुदयपर्वते इति विश्वः । मंडलं बिम्बदेश
यो रिति च । अत्र राजादिपदानामभेदेनाभिन्नपदश्लेषत्वं ॥ ॥ मधुरा इत्यादि । कोकिलागिर आकर्ण्यंते । असितेक्षणाः
श्यामनेत्राः प्रियाः श्लिष्यंते च । कीदृश्यः मधुराः श्रुतिम[illegible]यश्च । रागवर्द्धिन्यो ऽनुरागजनिका रतिजनिकाश्च । को
मलामनोज्ञा मृद्व्यश्च । मदकलाः यौवनवसंतादिकृतमंत[illegible]क्षमधुराः मदेन मद्यविकारेण कलध्वनियुक्ताश्च । अ
सिते उपवेशिते निश्चलीकर्तेक्षः प्रमोदानुभवादीक्षणे यासि[illegible]स्तीति मधुरं रवमाकर्णय निश्चलाक्षो भवति । पक्षेऽ
सितेक्षणाः । कीदृश्यः कोकिलानामिव गिरो यासां ताः । अत्र क्रि[illegible]यो[illegible]ऽत्र क्रियैकत्वमितरपदानामभिन्नानामेवार्थभेद
यबोधकता ॥ ॥ स्वभावेत्यादि । कांताभिः प्रेषिता दृशो दूत्यश्चेडि[illegible]ान् वल्लभानाकर्षंति । कीदृश्यः स्वभावेन सहजेन मधु राम
रा ललिताः । तदुक्तं मत्संगीतसर्वस्वे मधुराकुंचितांता च सभ्रूक्षेपा [illegible]स्मिता । समन्मथविकारा च दृष्टिः सा ललिता मतेति । ३८
स्निग्धाः स्नेहवत्यः उल्बणमधिकं रागं लौहित्यं बिभ्रत्यः । पक्षे सहजम[illegible]ताः यद्वा स्वभावात् प्रियवादिन्यः स्निग्धा आत्मीयाः अ

इत्यो२

विकं रागं मधु विकार कृतं स्निसंत्यः। यद्वा रागमधुरागं कथयंत्यः। अ[illegible]प्रियाकर्षणरूपैकैव क्रिया साधारणीत्येकक्रियत्वं भिन्न
पदाभिन्नपदाभ्यामस्य च कोभेद इति पृष्ठति प्रथमयोरिति। वा शब्दः[illegible]र्थे। तत्र रंतवेति तयोरेकैकस्यैव शकारणपत्रत्वमत्र तु द्व
योर्द्वयोरपि शाकारणिकत्वमिति भेद इत्यर्थः। अनेककर्तृकत्वे नायं भिन्नकारकोदाहरणमपीत्याह अयमिति॥ ॥गति
रित्यादि। तस्या नायिकाया गतिर्गमनं वेणी केशरचना च नागेन हस्तिना सर्पेण च तस्या वपुरूरुद्वयं च रंभया ऽसरोजेदनकद
ल्या च तस्याः पाणी हस्तौ ओष्ठौ च प्रवालैर्विद्रुमैः पल्लवैश्च सर्वाणि[illegible]वन्नाधयुः। नागो हस्तिभुजंगयोरिति शाश्वतः। कदल्यप्सर
सो रंभेति च। पल्लवे विद्रुमे चापि प्रवाल इति धरणिः। गतिनाग[illegible]त्यत्वादाह धर्मेति। अत्र नानाकर्तृकत्वादेव भिन्नकारक
ता॥ ॥कलेत्यादि। हे कलभाषिणि मधुरवचने तव दृष्टिः क[illegible]श्वसनीयत्वं विश्वासविषयतां याति। किंतु न कस्यापि। अत्र हेतु
ः कृष्णश्यामा अर्जुना धवला अन्तरक्ताप्रान्तलोहिता च। पादशि[illegible]यं क्रमः। कर्णपर्यन्तगामिनी च। पक्षे कृष्णे हरौ अर्जुने पार्थे चा
नुरक्ता ऽनुरागवती कर्णपक्षपातिनी च या सा विरुद्धो भयगताकथं विश्वसनीया भवति। वलक्षो धवलोऽर्जुन इत्यमरः। अत्र कर्तुरे
कतया ऽभिन्नकारकता॥ २२॥ भावनालक्षणमाह त्वेत्यादि। निजाशयकथनमन्यकथनमन्यापदेशश्च भाविकं भावेकवेरभिप्रा
येण वं भाविकमित्यन्वर्थनामतापि। तद्भेदभाविकयोरभेदमाह मतामिति। सोपि तद्भेदोपि॥ लावण्य इत्यादि। भावयथ तेदुर्ग[illegible]ह्या
दृष्टे यस्मिन् भ्रुकुटिका यत्र न व्याहारः गृह्यते आभाषमाणे। विलुभ्यते अभिनीयमाने यत्र न सवयस्य या तं मे कथयमानं यदि मे
इच्छसि जीवितं। इदृश्य यस्मिन् दृष्टे दुर्ग्रहा भ्रुकुटिर्नो वध्यते समंतान्न कथ्यते यच्चाभाषमाणे ऽव्याहारो न गृह्यते। यच्चाभिनीयमाने वय

म९ ना१

स्ययासनस्तुभ्यते· तं मानं मम कथय· यदि मम जीवनमिच्छसि। अत्राकांक्षितरूपस्याभिप्रायस्य कथनं॥ ॥ दंशेनेत्यादि· दंशनेन
वलितं दृढकं विबन्धनं दीर्घं सुपरिणाहं। भवति गृहे स्वाधीने मुसलं धन्यानां महिलानां। इह· उत्तमस्त्रीणां गृहे दृढं शोभमुसलं स्वाय
त्तं भवति। कीदृशं· दंशनेधान्यादिमर्द्दने वलितं लग्नं। दृढं· स्वार्थे कन्। विगतवंधनं दीर्घं सुपरिणाहमतिस्थूलं च। मेढ्रपक्षे दंश
नेन गमर्द्दने वलितं संबद्धं दृढं विगतबन्धनं दीर्घं बतिस्थूलं च। अत्र मेढ्राभिप्रायेण मुसलोक्तेरन्यभावना॥ ॥ आसाद्येत्यादि।
आस्वादितमज्ञातेन यावत् तावत्ते वदन्यपृष्टीते। अवरमस्व[...]ना· त्र· रक्षयित्वा गृहपतिक्षेत्रं। इह हे वृषभ· गृहपतिक्षेत्रं र
क्षयित्वा त्वमवरैः स्वक्रीडय· अज्ञातेन त्वया यावदेवास्वादितं ता[...]ति वर्द्धितं वैधय। अत्र वृषभमभिवारणव्याजेनोपपतिनिवार
णमन्यापदेशः॥ ॥ मलिसीत्यादि· मनुष मधुमथ प्र[...]विदशे पादपरत्नं। अपजहि मुग्धस्वभावं संभावय सुरना
थयादवलोकं। इह हे सुरनाथ· इन्द्र· यदि मधुमथस्य कृष्ण[...] प्रीतिं मनुषे स्वीकरोषि· देवपादपरत्नं पारिजातं संद
दाने सति मुग्धस्वभावं मौग्ध्यमपजहि· त्यज· यादवलोकं संभा[...]प्रीणन्। अत्र इंद्राभिप्रायः सत्यकेन तत्सारथिना व्यक्तं प्र
काशितः॥ ॥ निःशेषेत्यादि· हे दूति इतः स्थानात् त्वं वापीं [...] स्नातुं गतासि· तस्याधमस्यांतिकं समीपं न गतासि। हे मिथ्या
वादिनि· हे सुहृज्जनस्याज्ञातदुःखागमे। स्नानचिह्नान्या[...] स्तनतटस्य शोषकारिनवंदनमस्ति· तवाधरोपि त्यक्तलौहि
त्यः तव नेत्रे अत्यर्थमंजनशून्ये। तथा तवेयं तन्वी कृशा। तनुः शरीरं पुलकिता· रोमाञ्चवती च। अत्र स्नानसंयोगयोस्तुल्यस्य चि
ह्नस्योपदर्शनेन प्रकरणपरिप्राप्तं दूतीदुश्चेष्टितमुद्भिन्नं न च प्रागल्भ्यक्तता॥ ॥ अम्लानेत्यादि· किंतु हे सखि· तवांगानाम मु

राम ३९

स्फुरद्दंटं. कश्मिमानं. कृशात्वं. कोन.नामोल्लेखते. किंतु नयत एवायद्यपि [illegible] दृशौ. अम्लाने म्लानिहीने उत्पन्ने इव कोमले मनोज्ञे
स्तः। कीदृशे। नीलकज्जलेनाञ्जिते यतः। कर्पूरस्य स्फुरणात् संवं [illegible]। पांडरले गंडफलके संवलितः संवद्धः। स्वासा
श्च कन्दुकक्रीडनार्थं यात्र मिश्रमणी. तत्स्रजवाः संतु। अंगानां क्री [illegible] तिं वोढुं यद्दूशीलं येषां. तेषां. सहजरम्याणा
मित्यर्थः। अविनयवत्याः असत्याः। अत्राविनयवत्याः आशा [illegible] स्या [illegible] दृश [illegible] तः। किंचिद्याव्यक्तीष्टा तदस्तु नयरूपता॥
॥२२॥ संसृष्टिलक्षणमाह। संसृष्टिरिति नानालंकाराणां संकरी [illegible] संसृष्टिः। छायेति. प्रतिबिम्बदर्पणवदित्यर्थः। क्षीरं
दुग्धं। पांशु धूलिः। चित्रेति। चित्रलिखितवर्णिकावदित्यर्थः [illegible] त्यादि। समुद्रस्तरंगाग्रैः फेनचन्दनं पिनष्टीव इंदुः कौस्तु
दादायदिगंगनालिम्पतीव। अत्र इव शब्दाभ्यामुत्प्रेक्षाद्वयं। फेन [illegible] चन्दनं दिशा एवांगना इति रूपकद्वयं। तदिदं मिश्रितं
तिलतंडुलवत्। यथा तिलानां तंडुलानां च मिथो निरपेक्षाणामेव संकीर्णता। तथात्रापि॥ ॥निर्मलेत्यादि। विहतोयं व्यतिरेका
लंकारे। अत्र पूर्वार्द्धेन हे [illegible] त्वलेकारिदर्शितः। तदाधारक एव सदृशासदृशयोर्व्यतिरेकः। स च दर्पणे प्रतिबिम्ब इवाधाराधेयता
वेन व्यवस्थितः॥ ॥क्षीरेत्यादि। वसंतश्रीर्विसंतशोभा दृश्यते जनैः। कीदृशी। क्षीरेण दुग्धेन क्षालितश्चंद्रो यस्यां सा। नीलीद्रव्येण
धौतं क्षालितमम्बरमाकाशं यस्यां सा। टंकेन पाषाणदारणेन उल्लिखित उत्तंकितः सूर्यो यस्यां सा। टंकः पाषाणदारणइ
त्यमरः। अत्र उपमोत्प्रेक्षयोर्मिथो मिलनादव्यक्तता। उनयव्यंजकस्य तुल्यकक्षतया प्रवृत्तेरिदं वोद्धव्यं॥ ॥कृलेत्यादि। विहतो
यं नाविकालंकारः। अत्र यथा मृत्तिकापिंडे धूलिजलयोर्मिथो मिलनादव्यक्तता। तथा श्लेषविरोधयोर्व्याजस्तुतिप्रसंगतः संकरः॥

रजोभिरित्यादि। स कीदृशः। हयखुरक्षुण्णैः रजोभिर्मेघतुल्यैर्हिमनिभैश्च गगनं भूतुल्यमिव भूतलं गगनतलमिव कुर्वन्। अत्र यथा
नरसिंहजातौ सिंहनरयोर्णागणार्योर्व्यक्ताव्यक्तरूपं स्फुरणं तथात्र परिकरालंकारे हेतुमयोः ... व्यक्ताव्यक्तरूपः॥ ॥मयूरैरित्या
दि। मेघाञ्जलानि त्यजंतिस्म। महाटवीं महारण्यमिव प्रावृषं वर्षाकालं ध्या। कीदृशीं मयूरशब्दप्रचुरस्वरां। सहतार्त्तितवलतयाव
तितेतां। अत्रावयवाश्रितनीलादीनामवयवव्याश्रितेति चित्रवर्णं यथा गांगिनावस्तथाश्लेषादीनां समाध्यलंकारे व्यक्ताव्यक्तरू
पोऽङ्गांगिभावः प्रतीयत इति॥ चतुर्विंशतिरिति। इत्यनेन प्रकारेण चतुर्विंशतिरेतानुपमादयः काव्यालंकृतयश्चोक्ता इत्यन्व
यः। अत्र हल्लिंगतात्र। उनयेति। शब्दार्थाश्रिता इत्यर्थः॥ रत्नैरनवरोऽञ्जनिष्ठ गुणिनामाद्यैर्नवद्यः सतां साम्युद्धाद मर्यं तिका
पि स्तुष्टुवे नैयायिकं यं स्तुतं। तस्य श्रीराजजगद्धरस्य कवितुर्वाणीगमालंकृते टीकायां श्रुनयप्रकाशनपरिच्छेदश्चतुर्थो गतः॥
श्री:०:श्री इति महामहोपाध्यायधर्माधिकारिणिक श्रीजगद्धरविरचिते सरस्वतीकंठाभरणविवरणे चतुर्थः परिच्छेदः॥श्री:०:श्री
शुभमस्तु शकाब्दाः १५२१ अग्रहणशुदि पंचम्यां सोमवारे समाप्तमिदं॥ श्रीगौडदेशांतर्गत थौजिग्रामनिवासिना श्रीहरा
नंदसिंहेन काश्यां लिखितं पुस्तकं॥ श्री:०:श्री संवत् १६५६ श्री:
॥नारायणात्मज श्रीमद्राजानकात्मजन्मनः। एतज्जगद्धिजाख्या तुलक्ष्मीनाथस्य पुस्तकं॥१॥

श्री राम
८.

क